फाल्गुनमासः
वर्षम् – ६९
पञ्चमोऽङ्कः
विक्रमाब्दः २०७५
युगाब्दः ५१२०
५ मार्च २०१९


ISSN 2249-698X

# भारती

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–

## संस्कृत–मासपत्रिका





फाल्गुने दृश्यते देशे रङ्गक्रीडामहोत्सवः।
प्रह्लादरक्षणं चैव होलिकादहनं तथा॥

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | स्वराञ्जलिः | डॉ. सुरेन्द्रकुमारशर्मा | ५ |
| ५ | संस्कृतसमाचाराः | प्रधानसम्पादकः | ६ |
| ६ | श्रीकृष्णमन्त्रमहास्तोत्रम् | आचार्य पं. नथमलशास्त्री दाधीचः | ७ |
| ७ | गुरुनानकदेवः | प्रो. हरेराम त्रिपाठी | ८ |
| ८ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका | ११ |
| ९ | भूतस्य शिक्षा | डॉ. हर्षदेवमाधवः | १२ |
| १० | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | १६ |
| ११ | अस्माकं गुरवः | वेणीमाधव गो. धर्माधिकारी | १८ |
| १२ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | १९ |
| १३ | भारतभूम्याः विभूतयः | अविनाश शर्मा | २० |
| १४ | आधुनिकी शिक्षा मानवमूल्यञ्च | डॉ. सुनीता शर्मा | २३ |
| १५ | अभिधाशक्तिविषयेऽप्पयदीक्षिताशाधरभट्टयोर्मत.... | भोपालरामः रेबारी | २५ |
| १६ | वर्तमान-युगे संगणकस्य उपयोगित्वम् | जितेन्द्रकुमार पारीक | २७ |
| १७ | सर्वनामपरामृश्यस्य सर्वनाम्नाऽवचनम् | सीमा चौधरी | २९ |
| १८ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३१ |
| १९ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३३ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**



।। श्रीशः ।।
ISSN2249-698X
# भारती
संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**
जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**
स्व. जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयलः

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974

## मङ्गलाचरणम्

राकाचन्द्रनिभाननां सुरुचिरे पद्मासने संस्थिताम्
मन्त्रोच्चारणपूर्वकं हि विबुधाः पूजन्ति तां चण्डिकाम्।
दुर्गासप्तशतीस्तवेन शनकैः स्तुत्वा जगन्मातरम्
सर्वं यत्कृपयाऽऽप्नुवन्ति सततं वन्दामहे तां वयम्।।

## मासावतरणम्

चैत्रे चित्रविचित्रपुष्पनिचयैः संशोभते मेदिनी
भृङ्गाणां निनदैस्तथातिमधुरैः पुंस्कोकिलानां स्वनैः।
वृक्षाणामतिकोमलैः किसलयैराम्राङ्कुरैः स्वादुभिः।
मन्ये स्थावरजङ्गमैर्हि प्रकृतिः संसेव्यते सादरम्।।

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

फाल्गुनमासः
वर्षम् 69
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2075
मार्च, 2019
अङ्कः -5
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# विचारदर्शनम्

...✍ पं. प्यारेमोहनशर्मा

अस्माकं देशस्य विधाननिर्मातारो डॉ. अम्बेडकर-महोदयाः कश्मीरकृते विशेषाधिकारप्रदानपक्षे नाविद्यन्त। कश्मीरस्य भारते पूर्णरूपेण विलीनीकरण-मैच्छन्। तेषां जीवनकालस्यान्तिमे समये एव कश्मीरसमस्या जटिला संजाता। सहस्रशो हिन्दवो विस्थापिता अभूवन्। स्वयं बाबासाहिब पीडितानां सहायतामकरोत्। एकपञ्चाशदधिकैकोनविंशतितमे ख्रिष्टाब्दे लखनऊविश्वविद्यालयस्य छात्रान् सम्बोधयन्त-स्ते कश्मीरसमस्याविषयेऽप्यभाषन्त। तेऽवदन् कश्मीरस्य रक्षाकरणे यदि वयमसमर्थास्तर्हि तत्रत्यानां येऽस्माकं भ्रातरस्तेषां रक्षा विधेया। पूर्वजानां विस्मरणस्य प्रायश्चित्तो विधेयः-

तेऽवदन्-अतीते एतेषां मुसलमानानां पूर्वजा हिन्दूधर्मं स्वीकर्तुं तत्परा अभूवन्। किन्तु शुद्धिर्न शास्त्र-सम्मतेति कुप्रथया हिन्दवः परिवर्तने बाधका अभूवन्। पूर्वजानामेतादृशी अविचारिता एव भारते भीषणं संकटमुपातिष्ठत्।

कश्मीरस्य महाराजेन हरिसिंहेन कश्मीरराज्यस्य भारते पूर्णरूपेण विलीनीकरणानन्तरमपि पं. जवाहर-लालमहोदयाः समस्यामेकामुदपादयन्। शेखअब्दुल्ला-महोदयैः सह पंडितजवाहरलालस्य समधिकस्नेह-सम्बन्धैः विशेषाधिकारस्य प्रावधानं कृतम्। अनेन प्रकारेण कश्मीराय संविधाने 370 धारा समायोजिता। अम्बेडकरमहोदयाः श्यामाप्रसादमुखर्जीमहोदयाश्च द्वावपि धाराया घोरं विरोधमकुरुताम् किमिति मुस्लिम-तुष्टीकरणम्?

डा. अम्बेडकरस्य दूरदृष्टिः परिस्थितेः गाम्भीर्यं पर्यचिनोत् अतः धारा 370 जन्यदुष्परिणामान् नेहरुमहोदयानकथयत्। डॉ. अम्बेडकरः 370 धारायाः विरोधं स्वसहयोगी मौलानाहसरतमोहानीद्वाराप्य-कारयत्। नेहरुमहोदय आश्वासनं प्रायच्छत् अवदच्च धारेयमस्थायिनी वर्तते। समागते समये स्वतः समाप्तिं यास्यति।

इतिहासः साक्षी वर्तते यदनया धारायास्य देशस्य अखण्डता एव संकटग्रस्ता संजाता। मुस्लिमतुष्टिकरण-कारणेनैव धारेयं संविधाने योजिता तथानेनैव कारणेन सप्ततिवर्षेभ्यो धारेयं सुदृढा समभवत्। त्यागपत्र-प्रदानानन्तरं डा. अम्बेडकरोऽवदत्।

मुसलमानानां संरक्षणाय सर्वकारः किमित्यधि-कचिन्तां विदधाति? यद्यपि यदा यत्र च संरक्षण-स्यावश्यकता भवेत् तेभ्यस्तद्दातव्यम् परन्तु केवलं मुसलमानेभ्य एव संरक्षणं किमर्थम्?

त्रिपञ्चाशदधिकोनविंशतितमे ख्रिष्टाब्दे औरङ्गाबादे दलितफेडरेशन सभां सम्बोधयन् डा. अम्बेडकरोऽवदत्। भारतीया नागरिकाः कश्मीरे कोटिशो रूप्यकाणां व्ययम-कुर्वन्। कश्मीरस्य भारते पूर्णरूपेण विलीनीकरणमेव न्यायोचितमस्ति। भारतीयसंविधानं 370 धारां योजयितुं पं. नेहरुमहोदयः शेख अब्दुल्लां डॉ. अम्बेडकर समीपं प्रेषयत्। प्रोफेसर मधोको लिखति-

अत्र ध्यातव्यं तदानीं डा. अम्बेडकरो विधिमन्त्रिपदेन सह संविधाननिर्माणसमितेः अपि अध्यक्ष आसीत्। अम्बेडकर अब्दुल्लां निरभर्त्सयत् असाववदत् कथमपि-एतन्न भवितुं शक्नोति यद् भारते केवलमुत्तरदायित्वमेव स्वीकुर्यात् अधिकारांश्च सर्वान् कश्मीराय प्रयच्छेत्। डा. अम्बेडकरः कश्मीराय विशेषाधिकारप्रदानस्य विरोध-मकरोत्। ते तु कश्मीरस्य पूर्णरूपेण भारते विलीनीकरण-मेवैच्छन्। अन्ते क्रोधवशादम्बेडकरोऽवदत् प्रधानमन्त्री-महोदयास्तु हैदराबादे कश्मीरे च संविधानविपरीतं कार्यं कर्तुं कटिबद्धाः विद्यन्ते। अहं विश्वसिमि शीघ्रमेव परिणामैः कष्टमनुभविष्यन्ति।

सर्वमिदं देशस्य दौर्भाग्यात् तदानीं जातम् सम्प्रत्यपि मुस्लिमतुष्टीकरणकार्यं तथैव प्रचलतीत्यलम्।

# स्वराञ्जलिः

❑ डॉ. सुरेन्द्रकुमारशर्मा

अ अकारे हि वयः विद्या धनप्राप्तिस्तथैव च।
सिध्यन्ति सर्वकार्याणि पुत्रलाभस्तथा ध्रुवम्।।

आ आकारे शोक-सन्तापो विरोधः सर्वजन्तुषु।
आवर्तसम्भवो व्याधिः दुःखं चैव न संशयः।।

इ इकारे परमं सौख्यं सिद्धिश्चैव प्रजायते।
नश्यन्ति सर्वरोगाश्च धनधान्यं प्रजायते।।

ई ईकारे धनलाभश्च पुत्रलाभस्तथैव च।
सिध्यन्ति सर्वकार्याणि सौभाग्यमनिशं भवेत्।

उ उकारे सर्वसन्तापो वियोगश्च भवेद् ध्रुवम्।
दुःखं चैव भवेद् घोरम् आपदश्च न संशयः।।

ऊ ऊकारे लभ्यते स्थानं प्रतिष्ठा चैव शोभना।
सिद्ध्यन्ति सर्वकार्याणि अर्थलाभो भविष्यति।।

ऋ ऋकारे अर्थप्राप्तिश्च रत्नलाभः समुद्भवः।
सिद्ध्यन्ति सर्वकार्याणि प्रतिष्ठा चैव दृश्यते।।

ॠ ॠकारे जायते व्याधिर्दुःखं संताप एव च।
मित्रैः सह विरोधश्च भवत्यत्र न संशयः।।

ऌ ऌकारे, लभ्यते सिद्धिः मित्रैः सह समागमः।
आरोग्यं जायते नित्यं मानसम्मानमेव च।।

ॡ ॡकारे दृश्यते हानिर्व्याधिश्चैव भविष्यति।
सम्पत्तिहरणं नित्यं कार्यहानिर्न संशयः।।

ए एकारे दृश्यते सिद्धिः मित्रैः सह समागमः।
ततश्च लभते सिद्धिं सुखं चैव शुभं भवेत्।।

ऐ एकारे वर्धनं चैव विरोधश्च भविष्यति।
विग्रहश्च भवेन्नूनं मृत्युश्चैव न संशयः।।

ओ ओकारे दृश्यते सिद्धिः दुःखशोकविनाशनम्।
सिद्ध्यन्ति सर्वकार्याणि भयं चैव न संशयः।।

औ औकारे सर्वकार्याणां सिद्धिसारश्च जायते।
मित्रैः महाविरोधश्च शोकः संताप एव च।।

अं अंकारे च महाहानिर्वर्धनं च भविष्यति।
महादुःखं महाक्लेशो भयं चैव न संशयः।।

अः अःकारे लभते सिद्धिं प्रतिष्ठां लभते नरः।
प्रलाभं च महासौख्यम् लभते नात्र संशयः।।

प्राचार्यचर, श्री दादू आचार्य संस्कृत महाविद्यालय, जयपुर


## पत्रस्य स्वामित्वसम्बन्धे अधिकृतं विवरणम्

## पत्रकम् 4 ( नियम : 8 )

| | | |
|---|---|---|
| 1. | प्रकाशनस्थानम् | – जयपुरम् |
| 2. | प्रकाशने कालावधिः | – मासिकपत्रम् |
| 3. | मुद्रकस्य नाम | – द्वारा – न्यू जय शिवा प्रिन्टर्स |
| | नागरिकता, संकेतः | – भारतीयः, गोपालबाड़ी, जयपुरम् |
| 4. | प्रकाशकस्य नाम | – माणकचन्दमाहेश्वरी |
| | नागरिकता, संकेतः | – भारतीयः, भारतीभवनम्, बी–15, न्यूकॉलोनी, जयपुरम्। |
| 5. | सम्पादकस्य नाम | – श्रीप्यारेमोहनशर्मा |
| | नागरिकता, संकेतः | – भारतीयः, भारतीभवनम्, बी–15, न्यूकॉलोनी, जयपुरम्। |
| 6. | पत्रस्य संपत्तेः अधिकारस्यांशभाजां वा जनानां संस्थाया वा नाम संकेतः | – ''भारतीय-संस्कृत-प्रचार-संस्थान राजस्थान जयपुर'' |

अहं माणकचन्द माहेश्वरी घोषयामि यत् उपरिलिखितं विवरणं मद्विश्वासेन परिज्ञानेन च सत्यमस्ति।

दिनांकः 01-03-2019

# प्रान्तसम्मेलनम् जोधपुरप्रान्तस्य वार्ता चित्राणि च



संस्कृतभारतीजोधपुरप्रान्तस्य प्रान्तसम्मेलनं फरवरीमासे द्वितीयतृतीयदिनाङ्कयोः हनवन्तादर्शविद्या-मन्दिरे लालसागरे जोधपुरे सम्पन्नम्।

द्वितीयदिनाङ्के उद्घाटनसत्रे मुख्यवक्ता संस्कृत-भारत्याः अखिलभातीयाध्यक्षः प्रो. भक्तवत्सलः सर्वेषां कार्यकर्तॄणाम् उत्सावर्धनं कृतवान्। अतिथिरूपेण जय-नारायणव्यासविश्वविद्यालयस्य संस्कृतविभागाध्यक्षा प्रो. सरोजकौशलः उत्तररेल्वेजोधपुरस्य वित्तनियन्त्रकः श्रीआशुतोषशर्मा संस्कृतभारत्याः अ. भा. सङ्घटनमन्त्री श्रीदिनेशकामतः राजस्थानएडवोकेटबारएसोसियेशनस्य श्रीरणजीतजोशी मुख्यचिकित्सासमाजकल्याणाधिकारी एस श्रीमहेशकुमारः संस्कृतभारतीजोधपुरप्रान्ताध्यक्षः प्रो. सत्यप्रकाशदुबे चासन्। द्वितीये सत्रे श्रीदिनेशकामत-महोदयः संस्कृतभारत्याः सविस्तरं कार्यपरिचयम् उक्तवान् कार्यकर्तॄन् च प्रबोधितवान् यत्संस्कृतभारत्याः कार्यम् अखिलेऽपि विश्वेऽस्मिन् वर्धमानमस्ति अतः जोधपुरप्रान्ते कार्यवर्धनम् इतोऽपि वेगेन भवेदिति। तृतीयसत्रे प्रात्यक्षिकं प्रदर्शितम्।

बालकेन्द्रस्य प्रात्यक्षिकं जोधपुरमहानगरशिक्षण-प्रमुखः श्रीमानारामः आदर्शविद्यामन्दिरस्य छात्रान् उद्दिश्य प्रदर्शितवान्। भवतां न्यायालयः इत्यस्य प्रात्यक्षिके श्रीदिनेशकामतः आरोपी श्रीताराचन्दरेप-स्वालः वाक्कीलः डॉ. गोपालनारायणशर्मा न्यायाधिपतिः च आसन् तृतीये दिनाङ्के प्रथमसत्रे गणशः गोष्ठी आसीत्। दायित्ववतां गोष्ठीं राजस्थानक्षेत्रसङ्घटनमन्त्री श्रीहुलासचन्द्रः महिलानां गोष्ठीं श्रीदिनेशकामतः इतरेषाञ्च गोष्ठीं प्रो. भक्तवत्सलः स्वीकृतवन्तः।

द्वितीयसत्रे जोधपुरप्रान्ते कार्यविस्तारं कर्तुं योजनानिर्माणं श्रीहुलासचन्द्रः उक्तवान्। समारोपसमारोहे श्रीदिनेशकामतः मुख्यभाषणं कृतवान्। जयनारायण-व्यासविश्वविद्यालयस्य कुलपतिः प्रो. गुलाबसिंहचौहानः राजस्थानायुर्वेदविश्वविद्यालयस्य पूर्वकुलपतिः प्रो. बनवारीलालगौडः जोधपुरनगरनिगममहापौरः श्रीघनश्यामौझा इसरोवैज्ञानिक प्रो. सूपर्णपाठकः चातिथयः आसन्। कथकनृत्येन स्तुतिपरकं मङ्गलाचरणं ध्रुवी कृतवती।

पन्नाधात्री विख्यातं संस्कृतनाटकं श्रीदीपक-भारद्वाजस्य निर्देशने युवतरङ्गदलेन प्रस्तुतम्। कार्यक्रम-सञ्चालनकर्ता श्रीपाबूरामः आसीत्। जोधपुरजैसलमेर-बाडेमरजालौरपालीसिरोहीबीकानेरनागौरश्रीगङ्गानगर-हनुमानगढानां दशानामपि जनपदानां प्रतिनिधित्वेन षट् शतं कार्यकर्तारः भागं गृहीतवन्तः तेषु षष्टिः महिलाः आसन्।

जोधपुरप्रान्तस्य एतद् भव्यं सम्मेलनं प्रथमवारम् अभवत् यस्मिन् समारोहे कार्यकर्तॄणां भूयसी सङ्ख्या आसीत्। सर्वेऽपि दिनद्वयम् उषित्वा उत्साहं प्राप्य स्वकार्यक्षेत्रे कार्यवर्धनाय प्रेरणां स्वीकृतवन्तः। बालकेन्द्रस्य प्रात्यक्षिकं दृष्ट्वा बहवः बालकेन्द्राणि चालयितुं सम्प्रेरिताः।

# श्रीकृष्णमन्त्रमहास्तोत्रम्

( श्रीकृष्ण:शरणं मम )

❑ आचार्य पं. नथमलशास्त्री दाधीचः

( पूर्वानुवृत्तम् )

चिदानन्दः सदानन्दो मुकुन्दो मोहनाशनः।
त्रैलोक्याकर्षणः कृष्णः श्रीकृष्णः शरणं मम।। 321।।
स्मृतः संकीर्तितो ध्यातः श्रेयसां परमास्पदम्।
सर्वश्रेयस्करः कृष्णः श्रीकृष्णः शरणं मम।। 322।।
अकामैः सर्वकामैर्वा मोक्षकामैरुपासितः।
सर्वसिद्धिप्रदः कृष्णः श्रीकृष्णः शरणं मम।। 323।।
शान्तिक्षान्तिधृतिशक्तिभक्तिप्रेमरसार्णवः।
अहैतुकी-कृपामूर्तिः श्रीकृष्णः शरणं मम।। 324।।
कामबीजाधिपः कृष्णः कामदः काममोहनः।
कोटिमन्मथसौन्दर्यः श्रीकृष्णः शरणं मम।। 325।।
सर्वज्ञः पुरुषः कृष्णः सर्वगःसर्वजिद् विभुः।
लोकसाक्षी जगद्भर्ता श्रीकृष्णः शरणं मम।। 326।।
कृष्णो दुरन्तशक्तिर्हि कृष्णः शक्तित्रयात्मकः।
परेशोऽनन्तशक्तिश्च श्रीकृष्णः शरणं मम।। 327।।
कृष्णसम्मोहिनी राधा कृष्णो राधा-विमोहनः।
मोहिनी-मोहनो मुग्धः श्रीकृष्णः शरणं मम।। 328।।
इडानाडीगतश्चन्द्रः पिङ्गलायां स्वरो रविः।
सुषुम्णायां स्वरः कृष्णः श्रीकृष्णः शरणं मम।। 329।।
कृष्णे मे ज्ञानविज्ञाने कृष्णे निर्विषया मतिः।
शाश्वती मे रतिः कृष्णे श्रीकृष्णः शरणं मम।। 330।।
लीलया लालितो लालो गोपालो गोपवल्लभः।
मात्रा वोलूखले बद्धः श्रीकृष्णः शरणं मम।। 331।।
गोविन्दो गोकुलत्राता गोपगोपीजनप्रियः।
गोवत्सांश्चारयन् गोपः श्रीकृष्णः शरणं मम।। 332।।
ब्रजे कृष्णा-जले कृष्णः केकाकोकिलसंकुले।
गीयते सततं कृष्णः श्रीकृष्णः शरणं मम।। 333।।
रसिकैः साधुभिर्भक्तैः संस्तुतो वरदर्षभः।
कृष्णो मन्त्रमयैः स्तोत्रैः श्रीकृष्णः शरणं मम।। 334।।
गेयो निधिवने कृष्णो ध्येयो मधुवने ब्रजे।
सेवाकुञ्जे सदा सेव्यः श्रीकृष्णः शरणं मम।। 335।।
गीता-गेहे स्थितः कृष्णो गीताज्ञानामृतप्रदः।
गीता-स्वाध्यायसम्प्रीतः श्रीकृष्णः शरणं मम।। 336।।
चाणूरमुष्टिकारिष्टतृणावर्तान्तको हरिः।
निहन्ताऽऽसुरसैन्यानां श्रीकृष्णः शरणं मम।। 337।।
वेदेषु प्रणवः कृष्णो रसः कृष्णो जलेषु च।
चन्द्रार्कयोः प्रभा कृष्णः श्रीकृष्णः शरणं मम।। 338।।
कृष्णो बुद्धिमतां बुद्धिः कृष्णस्तेजो हि भास्करे।।
कृष्णः सनातनं बीजं श्रीकृष्णः शरणं मम।। 339।।
कामः सर्वेषु भूतेषु कृष्णो हि धर्मसम्मतः।
पृथिव्यां पावनो गन्धः श्रीकृष्णः शरणं मम।। 340।।
कृष्णः पुरोधसां मुख्यो बुद्धिभूतो बृहस्पतिः।
महर्षीणां भृगुः कृष्णः श्रीकृष्णः शरणं मम।। 341।।
पितृणामर्यमा कृष्णः सर्पाणां वासुकिस्तथा।
सिद्धानां कपिलः कृष्णः श्रीकृष्णः शरणं मम।। 342।।
कामधेनुर्गवां कृष्णो नदीनाञ्चैव जाह्नवी।
यज्ञानां तु जपः कृष्णः श्रीकृष्णः शरणं मम।। 343।।
कृष्णः शोभाद्युतिकान्तिः कृष्णः श्रीर्विजयो जयः।
योगक्षेमावहः कृष्णः श्रीकृष्णः शरणं मम।। 344।।
कृष्णो ज्ञानवतां ज्ञानमत्यर्थं ज्ञानिनां प्रियः।
ज्ञानात्मा ज्ञानयोगस्थः श्रीकृष्णः शरणं मम।। 345।।
नीतिमतिविभूतीनामाश्रयो जगदीश्वरः।
नामधामस्वरूपस्थः श्रीकृष्णः शरणं मम।। 346।।
हरिर्नरहरिः कृष्णो रामो विष्णुश्च माधवः।
दामोदरो हृषीकेशः श्रीकृष्णः शरणं मम।। 347।।
जन्म कर्म न कृष्णस्य नामरूपे गुणागुणौ।
मायया सगुणः कृष्णः श्रीकृष्णः शरणं मम।। 348।।
सूक्ष्मः सर्वेन्द्रियातीतो हृदि स्थः परिभावितः।
स्वयंज्योतिः सदाभासः श्रीकृष्णः शरणं मम।। 349।।
सर्वं पुरुष एवेदं भूतं भाव्यं भवात्मकम्।
दृश्यते सूक्ष्मया बुद्ध्या श्रीकृष्णः शरणं मम।। 350।।

''जय जय श्रीकृष्णमन्त्र महास्तोत्रे दशमो विरामः''

।। श्रीकृष्णः शरणं मम।।

( पूर्वप्राध्यापकः ), पो.-छापर ( चूरू )
Mob.: 9351226660

# गुरुनानकदेवः

❑ प्रो. हरेराम त्रिपाठी

भारतवर्षे देवतुल्यानां गुरूणां महती परम्परा प्राचीनकालादेव अस्ति। गुरुः प्रकाशपुञ्जवत् वर्तते यः जनसामान्यं समाजं वा सन्मार्गं प्रति प्रेरयति। अन्धकारेण अज्ञानेन च ग्रसितासंख्याकानां मनुष्याणां मनसि सद्विचारान् प्रदाय तेभ्यः सद्बुद्धिं च प्रददाति, तेषां जीवनञ्च उद्धारयति।

सः गुरुरेवास्ति यः मानवं सामाजं वा अपूर्णतायाः पूर्णतां प्रति प्रेषयति। एतादृश एव गुरुरासीत् 'गुरुनानकदेवः।'

गुरुनानकदेवस्य जन्म संवत् 1526 तमे वर्षे वैशाखशुक्ल तृतीयायां तिथौ अर्थात् अप्रैलमासस्य पञ्चदशदिनाङ्के 1465 तमे ईश्वीये वर्षे पञ्जाबप्रान्तस्य तलवण्डीनामकग्रामे अभवत्। वर्तमानकाले स्थानमिदं पश्चिमीपाकिस्तानदेशे 'नानक साहिब' इति नाम्ना प्रसिद्धमस्ति।

गुरुनानकदेवस्य पितुः नाम कल्याणदासः (कालूरामः) मातुः च 'तृप्ता' आसीत्। एतेषां महापुरुषाणां ज्येष्ठायाः भगिन्याः नाम 'नानकी' आसीत्। एतेनैवाधारेण बालकस्यास्य नाम 'नानकः' इत्यभवत्। महापुरुषोऽयं बेदीकुलस्य पूर्वजश्रीरामस्य सूर्यवंशेन सम्बद्धः मन्यते। श्रीरामचन्द्रस्य पुत्रः कुशः वेदानां गहनमध्ययनं कृतवान्।

मेहताकालूरामः सूबेदाररायस्य अधीनस्थः राजस्वाधिकारी आसीत्। बालकस्यास्य नानकस्य तेजस्विनं रूपं दृष्ट्वा ज्योतिर्विद् पं. हरदयालः साश्चर्योऽभवत्। नानकः बहु-स्नेही संवेदनशीलश्च आसीत्। वयसः सप्ततमे वर्षे बालकः नानकः पाठशालायां प्रेषितः। तत्र बालकस्यास्य सद्गुणं व्यवहारं शिक्षाञ्च दृष्ट्वा सर्वे स्तम्भिताः आश्चर्यीभूताश्चाभवन्।

बालकस्यास्य प्रश्नानामुत्तराणि शिक्षकाः अपि दातुं समर्थीभूताः न आसन्। संस्कृतभाषायाः ज्ञानाय बालकोऽयं पं. बृजनाथशर्माणं प्रति प्रेषितः। नानकस्य शिक्षां प्रति उदासीनतां दृष्ट्वा सर्वे शिक्षकाः चिन्तिताः आसन्।

अन्ततोगत्वा रायबुलाराख्यैः समाचारः प्रेषितः। शिक्षकैः तदा तं बालकं फारसी भाषायाः ज्ञानं येन रूपेण भवेत् इति निर्णयः कृतः। फारसीभाषापठनार्थं सः बालकः मौलवीं प्रति प्रेषितः। परञ्च नानकदेवः तत्रापि औदासीन्यमेव भजतेस्म। तदा एषः बालः फारसीभाषायाः पठनमपि त्यजति स्म। बालकस्यास्य यज्ञोपवीतं नवमे वर्षे निर्धारितं पं. हरदयालेन, परञ्च यज्ञोपवीतधारणसमये बालकः स्वयमेव यज्ञोपवीते विद्यमानावयवतन्तूनाम् अद्भुतमादर्शं स्थापयति। अर्थात् यज्ञोपवीतस्य आदर्शपरिभाषां प्रदर्शयति स्म।

नानकदेवस्य पिता तस्मै विंशतिः रूप्यकाणि प्रदाय व्यापारार्थं प्रेरितवान्, अथ च एकं सहयोगिनं नियुक्तवान् तदा च तौ व्यापारार्थं गतवन्तौ। मार्गे नानकदेवः पश्यति एकां साधुमण्डलीं तस्यां साधुमण्डल्यां ये साधवः सन्ति ते प्रायशः कृशकायाः सन्ति। दृश्यमिदं संदृश्य गुरुनानकदेवः विचारयति यत् वास्तविक (सच्चा सौदा) व्यापारस्तु साधुसेवा एव वर्तते अतः साधूनां कृते भोजनस्य व्यवस्था करणीया इति तेन विचारितम्। गुरुनानकदेवस्य मानसिकीम् उद्वेलनां ज्ञात्वा साधवो वदन्ति यत् धनमिदं भवतः पिता भवन्तं व्यापारार्थं प्रदत्तवान् अतः भवान् व्यापारं करोतु। परञ्च नानकदेवस्य

हृदयं करुणया कारुणिकं जातम्। तदा च नानकदेवः वदति यन् मम पिता धनमिदं मह्यं वास्तविक-व्यापारार्थं (सच्चा सौदा) प्रदत्तवान् अतः मम दृष्टौ बुभुक्षापीडितेभ्यः साधुभ्यः भोजनस्य व्यवस्थैव वास्तविकः व्यापारः (सच्चा सौदा) वर्तते। अतएव नानकदेवः विंशतिः रूप्यकाणि परिमितं धनं प्रदाय साधूनां कृते भोजनव्यवस्थां करोति।

नानकदेवः गृहं प्रति गच्छति यावत्-यावत् गृहस्य समीपे याति तावती तस्य चिन्ता बलवती जाता यत् गृहं गत्वा पितरं किं कथयामीति। यतोहि मे पिता मह्यं धनमिदं व्यापारार्थं दत्तवानिति। अतः भयवशात् नानकदेवः सायंकालेऽपि गृहं न याति अथ च एकस्मिन् वृक्षे आरोहति, रात्रावपि तस्मिन्नेव वृक्षे वसति। प्रातः काले नानकदेवस्य पिता वृत्तान्तं सर्वं ज्ञात्वा तत्र गच्छति सः पश्यति यत् नानकदेवः वृक्षोपरि विराजते एतद् दृष्ट्वा नानकदेवस्य जनकः तं नानकदेवं ताडयति।

ताड्यमाने जाते सति रायबुलारोऽपि तत्रागच्छति स च नानकदेवस्य कष्टमिदं दृष्ट्वा मेहताकालूरामं (नानकदेवस्य पितरं) प्रति वदति यत्-नानकदेवेन साधुभ्यः यत् भोजनादिकं प्रदत्तं तत्तु भवतः आज्ञायाः पालनमेव कृतमस्ति। भवता एव स उपदिष्टः यत् वास्तविकः व्यापारः (सच्चा सौदा) कर्त्तव्य इति। अत एव अयं व्यापारः (सौदा) तेन कृतः स तु वास्तविकः एव (सच्चा) वर्तते। भवान् धनार्जनमात्रमेव व्यापारं मन्यते परञ्च नानकदेवस्य दृष्टौ वास्तविकम् अर्जनं व्यापारश्च मानवानां सेवा एव वर्तते।

नानकदेवस्य ज्येष्ठायाः भगिन्याः विवाहः सुल्तानपुरनिवासिना जयरामेण सह अभवत्। जयरामः नवाबदौलतखाँमहोदयस्य 'दीवान' इति पदे आसीत्। सः एकदा गरुनानकदेवं तस्य दरबारे स्वेन सह नीत्वा गच्छति। नानकस्य व्यक्तित्वेन स च नवाबः बहुप्रभावितः भवति। स नानकदेवं स्वान्नभण्डारस्याधिकारीति पदे नियुक्तवान्। महत्वपूर्णेऽस्मिन् पदे कार्यं कुर्वन् नानकदेवः बहूनां निर्धनानां साहाय्यं कृतवान्।

एकदा नानकदेवः एकस्मै निर्धनाय धान्यादिकम् अन्नं प्रदत्तवान् अन्नतौल (मापन) समये यदा त्रयोदशसंख्या आगता अर्थात् त्रयोदश-तेरह-(तेरा) अतः तेरा-तेरा-तेरा इति उक्त्वा सर्वं धान्यादिकम् अन्नं तस्मै प्रदत्तम् इति। एतद् दष्ट्वा जनाः नवाबदौलतखाँ-महोदयस्य पार्श्वे गत्वा नानकदेवस्य घटनामिमां वर्णितवन्तः तदा नवाबः क्रुद्धो भूत्वा तत्कालमेव अस्मिन् विषये अन्वेषणार्थं समितिमेकां घटितवान् अथ च नानकदेवः एकस्मिन् प्रकोष्ठे परिसीमितः कृतः तैः। परञ्च परीक्षणानन्तरं तैर्ज्ञातं यत् धान्यादिकमन्नं तावदेव प्राप्तं यावत् पूर्वमासीत्। दृश्यमिदं दृष्ट्वा दौलतखाँमहोदयः आश्चर्यचकितो भवति। अथ च घटनामिमां सर्वे चमत्कारपूर्णाम् अकथयन्।

नानकदेवस्य आचरण-व्यवहारादिकं विचित्रन्तु आसीदेव अस्मात् कारणात् तस्य पितरौ बहुचिन्तितौ स्तः। ताभ्यां चिन्तितं यत् नानकदेवः व्यावहारिकः सामाजिकश्च भवेत् अतः अस्य विवाहः करणीयः इति। तदा च नानकदेवस्य एकोनविंशतितमे वयसि बाबामूलायाः पुत्र्या 'सुलखणी' नामधारिण्या सह विवाहः अभवत्। तस्य पितरौ चिन्तितौ आस्ताम् यत् नानकदेवः आध्यात्मिकैः वचनैः विरक्तः भविष्यति परञ्च इत्थं नाभवत्। नानकदेवस्तु संपूर्णमानवतायाः सेवां कर्तुं वाञ्छति।

नानकदेवस्य द्वौ पुत्रौ शरीचन्द्रलक्ष्मीचन्द्रौ आस्ताम्। एकदा नानकदेवः प्रतिदिनवत् स्नानार्थं नद्यास्तटे अगच्छत्। तस्मिन् समये तेन सह तस्य सेवकः

अप्यासीत्। सः (नानकदेवः) वस्त्रहीनः सन् जले गच्छति परञ्च जलात् बहिर्नागच्छत्।

यदा दीर्घकाले जाते सत्यपि सः बहिर्नागच्छत्। तदा सः सेवकः गृहं प्रत्यगच्छत्। गृहगमनानन्तरं सः सेवकः तस्य नानकदेवस्य पारिवारिकजनानां समक्षं सम्पूर्णं जलनिमग्नघटनायाः वृत्तान्तं वर्णितवान्। वृत्तान्तमिदं ज्ञात्वा नानकदेवस्य परिवारजनाः तत्र गतवन्तः यत्र नानकदेवः जले निमग्नो जातः। यदा बहुप्रयासेनापि सः न मिलति तदा तस्य परिवारजनाः चिन्ताग्रस्ताः अभवन्। घटनयाऽनया सर्वे दुःखनिमग्नाः अभवन् परञ्च तस्य ज्येष्ठायाः भगिन्याः नानकीदेव्याः दृढ़विश्वासोऽयं आसीद् यत् मे भ्राता नानकदेवः जले निमग्नः भवितुं न शक्नोति सः तु अवश्यमेव पुनरागमिष्यतीति। अग्रिमे एव दिवसे प्रातः कालीनवेलायामेव सः नानकदेवः जलात् बहिरागच्छति। दृश्यमिदं दृष्ट्वा सर्वे जनाः स्तब्धाः अभवन्। यदा नानकदेवः जलात् बहिरागतवान् तस्मिन् समये तस्य प्रथममेव वाक्यमासीत् यत्-न कोऽपि हिन्दुः न कोऽपि यवनः। अर्थात् सर्वे मानवाः (मनुष्याः) सन्ति।

नानकदेवस्य विचारणेयमासीत् यद् ईश्वरस्य चिन्तनं मननम् अथ च मानवसेवा एव सर्वोत्कृष्टं कार्यमिति। नानकदेवस्य मानवसेवाविषयकसूचनां प्राप्य सर्वे हर्षोल्लसिताः आनन्दिताश्चाभवन्।

मानवसेवार्थं नानकदेवः गृहत्यागाय निश्चयं कृतवान्। समाचारमिमं श्रुत्वा नानकदेवस्य पितरौ बहुचिन्ताग्रस्तौ अभवताम्। ज्येष्ठैः पितरौ प्रति स्वकर्त्तव्यपालनार्थं प्रेरितः स च अथ च गृहत्यागं मा कुरु इति उद्बोधितः। तस्य पत्नी सुलखनी, ज्येष्ठा भगिनी नानकी अपि तं गृहत्यागविषये-गृहत्यागं मा कुरु इति कथितवती। नानकदेवस्य गृहत्यागविषयकवार्तां श्रुत्वा तस्य पुत्रौ अपि रुदितवन्तौ। नानकदेवोऽपि किञ्चित्कालं यावत् भावनिमग्नः जातः परञ्च नानकदेवेन कथितं यत्-अहं परमात्मनः आज्ञया एव मानवसेवार्थं गृहं त्यजामीति। तदा च तेन गृहं त्यक्तम्।

नानकदेवः गृहत्यागं कृत्वा सर्वप्रथमम् एमनाबाद-नगरं प्रत्यगच्छत्। तत्र वसति मल्कीभागो नामक एको धनवान् जनः। तेन धनिकेन तत्र आयोजितः एकः महाभोजः। तदा यात्रा-प्रवाससमये नानकदेवेन सह 'मरदाना' नामकः जन आसीत्। सः (मर्दाना) चिन्तितवान्-यत् नानकदेवः नगरेऽस्मिन् धनिकस्य गृहे भोजनार्थम् आगतः इति। परञ्च नानकदेवस्तु एकस्य निर्धनस्य गृहे एव गच्छति अथ च तत्रैव भोजनादिकं करोति एतदस्ति नानकदेवस्य साधुत्वं वैशिष्ट्यमिति।

एकदा नानकदेवः एकस्मिन् लघुग्रामे अगच्छत्। तत्र ग्रामाद् बहिः एकः निर्धनः चर्मरोगी (कोढ़रोगेण ग्रस्तः) जनः वसति स्म। तत्समीपं कोऽपि ग्रामवासी न गच्छति स्म। परञ्च नानकदेवेन यज्ज्ञातं तस्मिन् विषये तदा सः तत्र अगच्छत्। तत्र गत्वा नानकदेवः तमाह्वयति-वदति च 'सत् करतार' इति। वचनमिदं श्रुत्वा सः कोढ़रोगी स्वकुटीरात् बहिरागच्छति वदति च भो महाशय! अत्र तु अहं वसामि नानकदेवः अकथयत्-यत् अद्य अहमत्रैव वसामि। तस्मिन् दिवसे-रात्रौ च नानकदेवः तत्रैव वसति। इति दृष्ट्वा सः रोगी भावनिमग्नः कृतकृत्यश्च जातः।

नैकेषु स्थानेषु भ्रमन् नानकदेवः रावलपिण्डी-स्थानस्य सविधे पर्वततले समागतः तत्र बलीकन्धारी इत्याख्यः एकः तापसः निवसति स्म। तस्मिन् स्थाने एकः निर्झरोऽप्यासीत्। तापसेन निर्झरजलोपरि आत्मनः अधिकारः अंगीकृतः आसीत्।

कदा-कदापि तापसः क्रोधे निमग्नः भवति स्म तदा सः जलमार्गं रुणद्धि स्म। अस्मात् कारणात्

निकटवर्तिजनानो काठिन्यं भवति स्म। यदा नानकदेवः पर्वततलसमीपं सम्प्राप्तः तदा तस्य सहयोगी मर्दानाख्यः जनः पिपासया व्याकुलः अभवत्। नानकः तं कथयति यत्-भवान् तत्र गत्वा जलमानय पर्वतस्य उन्नततामव-लोक्य सः भयाकुलो जातः। येन केनापि प्रकारेण पर्वतमारुह्य मुनिना जलं याचितम्। तदा च मुनिना तस्य नाम पृष्टम्। मर्दाना नामोच्चरति मुनिना तं तस्य गुरोः नाम पृष्टम्। तेन नानकस्य नाम परिचायितम्। इति नामश्रवणमात्रेणैव मुनिः क्रुद्धः सन् उवाच भवान् कीदृशः यवनः अस्ति यः एकं हिन्दूमुनिम् आत्मनः गुरु-रूपेणांगीकरोति। गच्छ अहं भवते जलं न यच्छामि। मर्दाना व्यथितः सन् ततः प्रतिनिवृत्तः पुनः नानकसविधे समागतः अथ घटनामिमां वर्णितवान्। तदा नानकदेवः वदति यत् भवता तेन मुनिना सह विनम्रतापूर्वकं नाचरितम् इत्युक्त्वा तं पुनः मुनेः सन्निधौ प्रेषयति परञ्च सः मुनिः तस्मै जलं न ददाति। मुनिः वदति यत् भवतः गुरुः भवत्कृते जलस्य व्यवस्थां न कर्तुं शक्नोति तु मत्समक्षे आगत्य क्षमायाचनां कुर्यात्। तदाहं भवत्कृते जलं दास्यामीति नो चेत् न दास्यामीति। तदा च मर्दाना स्वगुरोः नानकदेवस्य समीपम् आगत्य सर्वं वर्णितवान्। इति श्रुत्वा नानकदेवः मर्दाना नामाख्यं सहयोगिनं वदति यत् भवतः समक्षे यः पाषणखण्डः वर्तते तं पाषाणखण्डं उत्थाय प्रक्षिप्य तत्स्थाने गर्तं कुर्यात् किञ्चित् समयानन्तर-मेव ततः एकस्य विशुद्धजलस्य निर्झरः प्रस्फुटितः। इत्येतानि वर्तन्ते गुरुनानकदेवस्य चामत्कारिकपूर्णानि कार्याणि।

**श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ,**
**नई दिल्ली-110016**

# सूक्ति-सुधा

❑ **डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः**

**( 15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः )**

**तिलोपमं सुखं प्राप्य दुःखं मेरुसमं भजेत्।**
**मूढः संसारकान्तारे दुःखव्याघ्रादिसंकुले।।**

– मूढ़ मनुष्य दुःख रूपी व्याघ्र आदि जन्तुओं से भरे संसार रूपी वन में तिल के बराबर अल्प सुख को पाकर मेरु पर्वत के समान दुःख को पाता है।

**मानुष्यं दुर्लभं प्राप्य सुखे संसारसंभवे।**
**रतिं कृत्वा वृथा मूढ़ो दुःखं भजति दुःसहम्।।**

– मूर्ख मनुष्य, दुर्लभ मनुष्य जीवन को पाकर संसार मेंउत्पन्न सुख में प्रीति करता हुआ, व्यर्थ ही दुःसह दुःख को भोगता है।

**संसारसागरे घोरे दुःसहे विषमे चले।**
**धर्मनावं समारुह्य गच्छतां परमां गतिम्।।**

– घोर दुःसह विषय चललहराते संसार सागर में धर्मरूपी मौका पर आरूढ़ होकर परम/मोक्ष गति को प्राप्त करो।

**भवे मानयते सौख्यं मूढ़, इन्द्रियगोचरम्।**
**दुःखं तदेव जानाति ज्ञानी पापारिवर्द्धनात्।।**

– मूढ़ मनुष्य इन्द्रियों के जिस विषय को सुख मानता है, ज्ञानी मनुष्य उसी इन्द्रियों के विषय को पाप रूप शत्रु की वृद्धि से दुःख ही जानता है।

**रागद्वेष महाजलेऽति विषमे दुःखादिरन्ध्रान्विते,**
**शोकक्लेशभयादिमीनबहुले व्याघ्यादिभङ्गाकुले।**
**मृत्यू त्पत्ति भयानकेऽतिचपले संसारधोरार्णवे,**
**प्राणी मज्जति धर्मनौविरहितो मोहारिबद्धो वृथा।।**

– जो रागद्वेष रूपी विषय जल से भरा है, दुःखादि छिद्ररूपी बिलों से युक्त है, शोक, क्लेश, भय आदि मत्स्यों से पूर्ण है, रोग आदि लहरों से व्याप्त है, जन्ममरण से भयानक अत्यन्त चञ्चल हे, ऐसे संसार रूपी भयंकर समुद्र में मोहरूप शत्रु से बंधा प्राणी धर्म रूपी नाव के बिना व्यर्थ ही डूब रहा है।।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

कााल्पनिककथा:

# भूतस्य शिक्षा

❑ डॉ. हर्षदेवमाधवः

चत्वारि मित्राणि सन्ति। सर्वे रामपुरग्रामे एकस्यां रथ्यायां निवसन्ति। सर्वे एकादशवर्षीयाः। सर्वे शालायां पञ्चम्यां कक्षायाम् एकस्मिन् वर्गे पठन्ति। तेषां नामानि- रमणः, भरतः, छगनः, मगनः। रमणः कृषीवलस्य पुत्रः। भरतः स्वर्णकारस्य पुत्रः। छगनः सुधाकारस्य पुत्रः। मगनः लोहकारस्य पुत्रः। सर्वे भ्रातरः इव सार्धं पठन्ति, खेलन्ति भ्रमन्ति। सर्वे दुर्ललिताः शालायां छात्राणां नायकाः सन्ति। अवकाशे ते नवानि साहसानि कुर्वन्ति। रमणः बलवान् अस्ति। भरतः बुद्धिमान् अस्ति। छगनः पठने कुशलः अस्ति। मगनः सदा अन्येषां साहाय्यं कर्तुं धावति। सर्वे जनाः तान् 'रामः, लक्ष्मणः, भरतः, शत्रुघ्नः' इति वदन्ति। परीक्षाकाले छगनः स्वमित्राणि पाठयति। इतः सर्वे उत्तीर्णाः भवन्ति। रमणाय व्यायामो रोचते। भरताय चित्रकला रोचते। छगनाय गणितं रोचते। मगनाय विज्ञानं रोचते।

श्रावणमासः आगतः। शालायां जन्माष्टम्याः लघुकः अवकाशः आसीत्। ग्रामात् बहिः शिवमन्दिरे उत्सवानां कृते मेलापकस्य आयोजनम् अभवत्। चत्त्वारि मित्राणि मेलापकं गन्तुं व्यचारयन्। तेषां पितरः मेलापके किञ्चित् अपि नवं साहसं कर्तुं निषेधम् अकुर्वन्। ते सर्वे मेलापके भ्रमणम् अकुर्वन्। तत्र क्रीडाचक्राणि भ्रमन्ति स्म। एकः ऐन्द्रजालिकः इन्द्रजालस्य मायां दर्शयति स्म। किन्तु एतान् किशोरान् दृष्ट्वा सः अवदत्, 'किशोराः! यूयं दुर्ललिताः, अहम् इन्द्रजालस्य प्रदर्शनं न करिष्यामि। यूयं मम मायां जानीथ।' चत्वारः किशोराः उपहारस्य आपणम् अगच्छन्। तत्र मिष्टान्नं खादित्वा सर्वे परस्परं परिहासम् अकुर्वन्। मेलापके एका बालिका प्रभ्रष्टा अभवत्। छगनः ताम् एकस्मिन् कक्षे अपश्यत्। सः बालिकां तस्याः पितृभ्याम् अददात्। बालिकायाः पितरौ तस्मै पारितोषिकं दातुम् इच्छतः स्म। किन्तु छगनः अवदत्, 'महाशय ! इदं मम कर्तव्यम्।' बालिकायाः पितरौ तस्मै धन्यवादान् दत्वा अगच्छताम् तदा रमणः एकं पुरुषं वानरेण सह खेलां प्रदर्शयन्तम् अपश्यत्। चत्वारः जनसमूहे अतिष्ठन्। किन्तु रमणः विना शब्दं वानरस्य समीपे गत्वा तस्य पुच्छम् आकर्षत्। वानरः सहसा अकूर्दत्। सर्वे जनाः भयभीताः अभवन्। ते चत्वारः उच्चैः अहसन्। मगनः वातगोलान् क्रीत्वा अददात्। बालेभ्यः आपणे एकः आपणिकः जनान् वञ्चयति स्म। अतः भरतः शनैः पृष्ठे गत्वा सिंहनानेदन सः तर्जयित्वा तस्य आसनं दूरम् अकरोत्। आपणिकः भयवशात् उपवेष्टुं प्रयत्नम् अकरोत्। किन्तु भरतः तस्य आसनं कक्षम् अनयत्। अतः सः भूमौ अपतत्। इत्थं परिहासं कृत्वा ते शिवमन्दिरम् अगच्छन्। तत्र सर्वे जनाः 'भूतनाथः जयति', 'शिवः जयति', 'ॐ नमः शिवाय,' 'भूतनाथमहादेवस्य जयो भवतु', इत्थं उच्चैः जयनादान् कुर्वन्ति स्म। ते दर्शनं कृत्वा दूरे शमीवृक्षस्य तले उपाविशन्। रमणः अपृच्छत्, 'शिवः कस्मात् भूतनाथः अस्ति? कस्मात् ते सर्वे भूतनाथं कथयन्ति?'

भरतः प्रत्युत्तरम् अददात्, 'अस्य शिवालायस्य नाम' 'भूतनाथमहादेवः' अस्ति। छगनः अवदत्, 'नहि, भूतनाथः अर्थात् सर्वेषां प्राणिनां नाथः।' मगनः सहसा अवदत् 'नहि, नहि, शिवः श्मशाने निवसति। तत्र भूतानि

प्रेताः, पिशाचाः, डाकिन्यः अपि वसन्ति। एते सर्वे महादेवस्य सेवकाः सन्ति।' तदा रमणः अवदत्, 'किम् यूयं सर्वे जानन्ति यत् अस्मिन् शमीवृक्षे भूतं निवसति, इति।' छगनः अब्रवीत्, 'अथ किम्। अत्र महाभयानकं, भीषणं भूतं निवसति। अस्माकं ग्रामस्य द्वौ कृषीवलौ भूतम् अपश्यताम्।' रमणः अवदत्, 'अहं भूतं द्रष्टुम् इच्छामि।' सः उच्चैः आक्रोशत्, 'भ्रातः भूत नीचैः आगच्छ। वयं त्वां द्रष्टुम् इच्छामः। छगनः अवदत्, 'भोः भूतमहोदय! अहं तुभ्यं मिष्टिकां चाकलेहं च दास्यामि।' मगनः अपि उच्चैः अहसत् 'यदि तव साहसम् अस्ति तर्हि आगच्छ। यदि त्वम् अस्माकम् आदेशं न श्रोष्यसि तर्हि वयं दण्डेन तवास्थिभङ्गं करिष्यामः।' रमणः आक्रोशत्, 'भो वयस्याः भूतानाम् अस्थीनि नैव भवन्ति। जनः मृत्योः पश्चात् भूतं भवति।' छगनः अवदत्, 'भूतं कदा आगमिष्यति? मम पितामही कथयति यत्,' 'भूतं यत् किञ्चित् कार्यं कर्तुं समर्थां भवति।' रमणः सहसा अवदत्, 'भूतम् अमावास्या रात्रौ द्वादशवादने नियतम् आगच्छति। अतः वयं भूतं द्रष्टुम् अमावास्याम् अत्र आगमिष्यामः।' छगनः उच्चैः अवदत्, 'भो, भूतमहोदय! त्वां मिलितुं वयम् अमावास्यां रात्रौ आगमिष्यामः । अस्माकं साक्षात्कारः निश्चितः। अधुना त्वम् अस्माकं प्रतीक्षां कुरु। इदानीं वयं साधयामः।' सर्वे स्वगृहम् आगच्छन्। सर्वेषां पितरः अपृच्छन्, 'अपि सर्वे कुशलिनः? किञ्चित् दुर्ललितं कृतं वा?' किन्तु सर्वे अवदन्, 'न हि, न हि, मेलापके आनन्दः प्राप्तः।' अमावास्यां रात्रौ चत्वारः किशोराः कृतकनिद्राम् अनाटयन्। सर्वे गृहजनाः अस्वपन्। शनैः शनैः ते द्वादशवादने द्वारम् उदघाटयन्। रमणः एकं लगुडं हस्ते अगृह्णात्। भरतः मोदकान् अगृह्णात्। मगनः एकं कर्तरीम् अगृह्णात्। छगनः हनुमतः प्रतिसराणि अगृह्णात्। सर्वे ग्रामस्य चतुष्के मिलिताः। तैः सह मोनुकुक्कुरः: अपि तान् अन्वसरत्। मोनुः चतुर्णां किशोराणां प्रियः। सर्वदा असौ सार्धम् अगच्छत्। सर्वे शमीवृक्षतलम् अगच्छन्। छगनः सर्वेषां कण्ठे प्रतिसरम् अबध्नात्। पञ्चक्षणाः व्यतीताः। सहसा मोनुकुक्कुरः अभषत्। सर्वे सावधानाः अभवन्। शमीवृक्षस्य शाखाः वेगेन अकम्पन्त।

रमणः अब्रवीत्, 'भूतभ्रातः! किं हिन्दोले उपविष्टः त्वम्? वयम् अपि समीरस्य सुखम् अनुभवामः।' भूतम् उलूकध्वनिम् अकरोत्। मगनः अब्रवीत्, 'भूतभ्राता तु उलूकः अस्ति। वयम् उलूकात् भयम् न अनुभवामः।' भूतं बालक इव रोदितुं प्रारभत। भरतः उच्चैः अहसत्, 'अहो! अयं तु शिशुकः। अहं निद्रागीतं गायामि। हे शिशुक! स्वपिहि ! मम बालकृष्ण! स्वपिहि।'

भूतं सिंहो भूत्वा महाहुङ्कारम् अकरोत्। तदा भरतः अवदत्, 'अहं सिंहस्य दन्तान् गणयिष्यामि। बहोः कालात् अहं सिंहं न अपश्यम्।'

रमणः अकथयत्, 'अहं तु लगुडेन सिंहस्य मस्तकं स्फोटयिष्यामि।'

ततः सिंहः अपि अगच्छत्। चत्वारः किशोराः उच्चैः अहसन्। छगनः अवदत्, 'भूतभ्राता अस्मात् बिभेति। अतः असौ नवानि नवानि रूपाणि धारयति।'

ततः सहसा वृक्षात् एकं सिंहासनं भुवि पतितम्। भरतः अब्रवीत्, 'अहो ! सिंहासनम् आगतम्।' अतः राजा अपि आगमिष्यति। तस्मिन् क्षणे महान् शब्दः अभवत्। एकम् अस्थिपञ्जरं सिंहासने उपाविशत्। तद् दृष्ट्वा चत्वारः उच्चैः अहसत्।

भरतः अवदत्, 'अहो ! भूतभ्राता अतीव दुर्बलः।' छगनः अपि अकथयत्, 'तस्य माता तस्मै भोजनं न ददाति।'

मगनः हास्येन सह अवदत्, 'भूतभ्राता दरिद्रः अस्ति।' भूतम् अट्टहास्यं कृत्वा अवदत्, 'अहं दरिद्रः नास्मि। पश्यत, अहं भोजनम् आनयामि।' तदा भोजनस्य पात्राणि आगतानि। अत्र रोटिकाः, पर्पटाः, ओदनं, दलं, शाकः– एतत् सर्वम् आसीत्।

रमणः अवदत्, 'भूतभ्रातः! यदि तव समीपे सर्वम् अस्ति तथापि त्वं न खादसि तर्हि, त्वं मूर्खः असि।'

भरतः अवदत्, 'तव समीपे मोदकाः न सन्ति। मम समीपे मोदकाः सन्ति। किन्तु अहं तु ब्राह्मणाय एव मोदकं ददामि।'

भूतम् अवदत्, 'अहं सत्यम् एव ब्राह्मणः। पश्यत।' भूतं ब्राह्मणोः भूत्वा सिंहासने उपाविशत्।

भरतः अवदत्, 'तर्हि त्वं मम मोदकान् गृहाण।'

भरतस्तस्मै मोदकानां पात्रम् अददात्। भूतं मस्तकं नामयित्वा मोदकान् अखादत्। तदा तस्य पृष्ठे गत्वा मगनः कर्तर्या भूतस्य शिखाम् अकर्तयत्। मदनः उच्चैः विहस्य अवदत्, 'अधुना भूतमहोदय! त्वम् अस्माकं सेवकः असि। तव शिखा मम समीपे वर्तते। अस्माकं सेवां कुरु।'

भूतं स्वशिरः अस्पृशत्। अपि च स्वशिखां मगनस्य हस्ते अपश्यत्। अतः भूतम् उच्चैः रोदनम् अकरोत्। छगनः तस्मै जलम् अददात्। भूतं दीनं भूत्वा अवदत्, 'हे शूराः किशोराः! यूयं सर्वे साहसिकाः। यूयं बुद्धिमन्तः। अहं युष्माकं सेवकः। किन्तु यूयं कस्मात् मत्तः न बिभीथ?' रमणः अहसत्, 'भ्रातः! वयं सर्वे हनुमतः भक्ताः। अतः वयं भयं न जानीमः। वयम् असत्यात् बिभीमः। अधर्मात् एव बिभीमः। पश्य, अस्माकं समीपे हनुमतः प्रतिसराणि सन्ति।'

भूतम् अहसत्, 'अतएव यूयं सर्वे सुरक्षिताः सन्ति। तथापि यूयं निर्भयाः स्थ। ये निर्भयाः सन्ति, तेषां किञ्चित् अपि कर्तुम् अहं न शक्तिमान्। अहं स्वयम् एव भूतयोनौ न आगतः। अहं पापं कृतवान्। अतः अहं पापयोनिं लब्धवान्।' छगनः अपृच्छत्, 'भ्रातः! त्वं कीदृशानि पापानि अकरोः?' 'कथयामि' भूतम् अवदत्, 'किन्तु यूयं मा भ्रातरं कस्मात् मन्यध्वे?' भरतः अवदत्, 'अस्माकं मातरः वदन्ति यत् बान्धवाः शिवभक्ताश्च स्वदेशः भुवनत्रयम्।' त्वम् अपि भूतम् असि। भगवतः शिवस्य भूतप्रेताः प्रियाः सन्ति।

भूतम् अवदत्, 'साधु भ्रातरः! अहं ब्राह्मणः आसम्। किन्तु अहं सन्ततिं न आप्नुवम्। अतः मोहवशात् अहं एकस्या ब्राह्मण्याः शिशोः अपहरणम् अकरवम्। सा ब्राह्मणी पुत्रवियोगेन अतीव दुःखिता अभवत्। अहं शिशुं प्रत्यर्पितवान्। किन्तु तस्मात् पापात् अहं भूतनाथः अभवम्। कथयत, किं युष्माकं प्रियं करोमि?' छगनः शीघ्रम् अवदत्, 'भ्रातः! वयम् अत्र रात्रौ आगताः। वयं चलितुम् अपि न शक्ताः। त्वम् अस्माकं कृते मिष्टान्नम् आनय। अस्माकं चरणानां संवाहनं च कुरु। तव नाम किम्?'

भूतं प्रत्युदतरत्, 'मम नाम महाकालः। युष्माकं कृते मिष्टान्नम् आनयामि। मम समीपे पञ्चविंशतिसेवकाः सन्ति।' पञ्चक्षणानन्तरं महाकालः मिष्टान्नम् आनयत्। सर्वे मिष्टान्नम् अखादन्। महाकालः सर्वेषां पादानां संवाहनम् अकरोत्। ततः सः अपृच्छत् इदानीं युष्माकं किं प्रियं करोमि? रमणः अवदत्, 'अस्माकं ग्रामे सरोवरः नास्ति। अतः जलस्य अभावः अस्ति। त्वं ग्रामात् बहिः सरोवरं रचय।'

भरतः अवदत्, 'अपि च अस्माकं शालां परितः पञ्चाशद् वृक्षाणाम् आरोपणं कुरु।' छगनः अवदत्, 'शालायाः समीपे आम्रवृक्षान् प्ररोहय। मह्यम् अपक्वानि आम्रफलानि रोचन्ते।'

मगनः अवदत्, 'अपि च ग्रामस्य मार्गान् अपि समीचीनान् कुरु। सर्वत्र गर्ताः वर्तन्ते।'

रमणः अवदत्, 'अपि किं करिष्यसि एतत् सर्वम्?' महाकालः अवदत्, 'एतत् सर्वं करिष्यामि। किन्तु प्रातः कालपश्चात् अहं किञ्चित् अपि कर्तुं न समर्थः।'

रमणः अवदत्, 'त्वं एतानि कार्याणि कृत्वा आगच्छ! वयम् अत्र तव प्रतीक्षां कुर्मः।' महाकालः अगच्छत्। सः कार्यं कृत्वा आगच्छत्। सः श्रान्तः आसीत्।

महाकालः अवदत्, 'भ्रातर! मम सेवकैः सह अहं सर्वाणि कार्याणि अकरवम्। किन्तु अधुना मां मा तर्जयत। अपि किञ्चित् कार्यम् अवशिष्टम् अस्ति वा?'

भरतः अवदत्, 'त्वम् अस्माकं ग्रामं त्यक्त्वा गच्छ।'

महाकालः अवदत्, 'भ्रातरः युष्माकं समीपे मम शिखा अस्ति। अतः अहं कुत्र अपि गमनं कर्तुं न समर्थः।'

छगनः अवदत्, 'तर्हि त्वं तव मोक्षस्य उपायं वद।'

महाकालः अवदत्, 'यदि यूयं शिवमन्दिरं गत्वा मम शिखां तत्र संस्थाप्य वदिष्यथ,' 'हे महादेव! महाकालं भूतयोनेः मोचय' इति, तर्हि अहं भूतयोनेः मुक्तः भविष्यामि। किन्तु किं यूयं युष्माकं कृते किमपि न इच्छथ? किम् अहं युष्माकं गुप्तं धनम् आनयानि?'

मगनः अवदत्, 'न हि, वयं श्रमिकाणां पुत्राः। वयम् अपि श्रमं कृत्वा धनम् अर्जिष्यामः। विना श्रमं प्राप्तं धनं भोगविलासेन जीवनं नष्टं करोति। धन्यवादाः। किन्तु वयं साहसप्रियाः। अतएव इदं साहसं कृत्वा ग्रामस्य श्रेयः अकुर्म। वयं तव मोक्षाय शिवमन्दिरं गत्वा प्रार्थनां करिष्यामः।'

चत्वारः किशोराः अवदन्, 'वयं त्वां मुक्तं करिष्यामः।' छगनः अवदत्, 'किन्तु पुनः कुकार्यं मा कुरु।' महाकालः अवदत्, 'नहि नहि, यूयं सर्वे परोपकारिणः। अहम् अपि अधुना पापं त्यजामि। मां मुक्तं कुर्वन्तु।'

सर्वे किशोराः 'तथास्तु' इति उक्त्वा ग्रामे स्वगृहम् अगच्छन्।

अपरेद्युः ग्रामजनाः ग्रामात् बहिः सरोवरं दृष्ट्वा आश्चर्यचकिताः अभवन्। तदा सर्वे ग्रामस्य मार्गान् सुव्यवस्थितान् अपश्यन्। शालायाः शिक्षकाः छात्राः च शालां परितः वृक्षान् अपश्यन्। सर्वे एतत् सर्वं कथम् अभवत्, 'कः अकार्षीत्, कस्मात् सहसा एतत् सर्वम् अभूत्'- इति परस्परम् अपृच्छन्।

ग्रामस्य प्रतिचतुष्कं सर्वे मिथः अपृच्छन्। केचित् अवदन् यत् 'एतत् सर्वं शिवस्य वरदानेन अभवत्।' इति। केचित् अवदन् यत् 'कोऽपि ऐन्द्रजालिकः रात्रौ एतत् सर्वम् अकरोत्' इति। कोऽपि अवदत् यत् 'ग्रामपञ्चायतेन एतत् सर्वं कृतम्' इति। कोऽपि प्रश्नानां समाधानं न आप्राप्नोत्।

चत्वारः किशोराः आम्रवृक्षस्य शाखाम् आरुह्य परिहासम् कुर्वन्ति। ते कथयन्ति यत् 'ग्रामजनानां पुण्यैः एतत् सर्वम् अभवत्।' इति।

ते पुनरपि नवसाहसं कर्तुं विचारयन्ति अधुना।।

**8, राजतिलक बंग्लोज, आबादनगरम्,**
**बसस्टोप के पास, बोपल, अहमदाबाद-380058**

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# तन्त्रशास्त्रि-राजगुरूणां स्मृतिग्रन्थः

जयपुरराजवंशो यो हि जयपुरनगर्या अष्टाविंश्यां शताब्द्यां निर्माणात् पूर्वम् आम्बेरराजवंशरूपेण विख्यातोऽभूत्, वैष्णवपरम्पराया अपि सम्मानं कुरुते, श्रीराधागोविन्ददेवस्य पूजनमेभिः कृतं क्रियते च, किन्तु तत्पूर्वं शक्तिपूजकोऽप्ययमभूत्, आमेरोपनगरे शिलादेवी राजवंशस्य पूज्याऽभूत्। तदनुसारं तान्त्रिकी शक्तिपूजापि राजवंशेनाऽनेन क्रियते स्म। शक्तिपूजा-परम्परानुरूपं राजवंशेनानेन तान्त्रिका विद्वांसः साधका राजगुरुत्वेन प्रतिष्ठापिता अभूवन्। एवंविधा एव राजगुरवोऽभूवन् मिथिलाऽभिजना ओझावंशजास्तान्त्रिका विद्वांसः। एते राजगुरुरूपेण संमानिता अभूवन्, प्रभूतभूसम्पदा विभूषिता 'बड़े ओझाजी' नाम्ना ख्याता राजगुरवो जयपुरे विद्वत्परिषदाऽपि संमान्यन्ते स्म। पं. त्रिलोचन झा प्रभृतीनां वंशे युगेऽस्मिन् प्रतिष्ठिता राजगुरवोऽभूवन् पं. विद्यानाथ ओझा महाभागाः येषां जन्म 18 अगस्त 1911 दिवसेऽभूत्, 22 जुलाई 1993 ई. दिवसे चैते दिवमारूढाः।

एतेषां स्मृतावेको विशालः स्मृतिग्रन्थ एतेषां पुत्ररत्नेन राजगुरुचन्द्रनाथझावर्येण प्रकाशितोऽस्ति यस्य लोकार्पणसमारोहोऽप्यभूत्। ग्रन्थेऽस्मिन् पं. विद्यानाथ-झा महाभागानां कृते संस्कृते त्रयः, हिन्द्यां च द्वादश लेखाः प्रकाशिताः सन्ति, वेद-तन्त्र-मन्त्र-दर्शनादिविषयान् विवेचयन्तः पञ्च लेखाः संस्कृते, 23 लेखा हिन्द्यां, त्रयो लेखाश्चाङ्गलभाषायां प्रकाशिताः सन्ति। अन्ते महाभागानामेषां जीवनचर्यायाश्चित्रावली मुद्रिताऽस्ति। प्रसङ्गतोऽत्रैव दरभङ्गाविश्वविद्यालयस्य कुलपतिचराणां डॉ. जयमन्तमिश्राणां श्रीसीताचरिताख्यस्य तथाकथितस्य महाकाव्यस्य माहात्म्यवर्णनाख्या काचन सामग्री सर्गद्वये मुद्रिताऽस्ति यस्यां तुलसीदासस्य रामस्तुत्यादिमङ्गला-चरणान्तर्गतं ''स्मृताऽपि तरुणातपं करुणया हरन्ती नृणा'' मित्यादिजगन्नाथपण्डितराजपद्यं ''विदेहकुलनन्दिनीं नमामि कमलात्मिकां प्रथितराम-वामाङ्गिनीम्'' इति रूपेण सीतायै समर्पितं चमत्कुर्यात् पाठकान्।

स्मृतिग्रन्थोऽयं मिथिलातः समागतानां पूजनीयानां तन्त्रविद्यानिष्णातानां राजगुरूणां स्मृतिं जागरयति, पं. विद्यानाथ ओझामहाभागानां कीर्तिं च विस्तारयतीति जयपुरीय-विद्वन्मण्डल्या इतिहासस्य महत्त्वपूर्णमङ्गं प्रतिनिदधाति।

**राजगुरु पं. श्रीविद्यानाथजी ओझा स्मृतिग्रन्थ सम्पा. डॉ. नारायणशास्त्री काङ्कर, प्रकाशक श्री चन्द्रनाथ झा, राजगुरु पं. श्रीविद्यानाथ झा धर्मार्थ संस्थान, बड़ा ओझाजी भवन, सिरह ड्योढी बाजार, जयपुर पृ.सं. 450 मू. नाऽङ्कितम्।**

## सानुवादा नूतन-शिल्पबद्धाः कथाः

विश्वजनीने कथासाहित्ये संस्कृतकथासाहित्यं मूर्धन्यं स्थानमधितिष्ठतीति सुविदितम्। पञ्चतन्त्रकथा आरभ्याऽद्यावधि संस्कृते कथासाहित्यमवतरति, प्राचीनतमं सदपि तन्नवीनतमं शिल्पं प्रतियुगं, युगानुरूपं प्रतिनिदधातीत्यपि विस्मयावहं गौरवप्रदं च। नवीनतम-कथाशिल्पमवतारयन्त्यः स्पशकथा (जासूसी, detective stories) अपि संस्कृते विलिखिताः,

लघुतम- कथा अपि (Ministories)। एवंविधानेव नूतनतम-कथाशिल्पभेदान् परिलक्षयन्तीनां कथानां सर्जको गुर्जरदेशीयः कविवर-हर्षदेवमाधवतनूजः डॉ. ऋषिराज जानी पुरस्कृतः सम्मानितश्च कथाकारोऽस्तीति गौरव-मस्माकम्।

कथाकारस्यास्य नूतनकथाशिल्पं प्रतिनिदधानानां षोडशकथानां संग्रहः सानुवादः सपद्येव प्रकाशमायातः। संग्रहेऽत्मिन् स्तबकद्वयमस्ति, प्रथमे स्तबके ८ कथाः, द्वितीये चापि ८ कथाः सन्ति, प्रतिस्तबकं तासां कथानां हिन्द्यनुवादोऽपि मुद्रितः। कथास्वासु कथ्यमपि नूतनयुगानुरूपम्, शिल्पमपि (शैली)। कथावस्तुषु वर्तमानयुगीनं जीवनं प्रतिबिम्बितमस्ति। कथमद्य भारतीया युवका विदेशेषु धनार्जनलालसया अमरीकादिदेशेषु निवसन्ति, तेषां मातृपितृप्रभृतयो वैवश्यमनुभवन्तीति नवीनतमा सामाजिकी विडम्बना। तां वर्णयन्ती कथा ''गर्भपातः'' भारत्यामपि प्रकाशिताऽभूत् (अप्रेल 2017) सा प्रथमे स्तबकेऽस्ति। कथं समाजस्यात्याचारैः पीड़िता जनाः कदाचन ख्रिस्तीयधर्मान्तरणं कृत्वा गच्छन्तीति कथावस्तु ''रुधिरकूपः'' शीर्षककथायां निबद्धमस्ति। अरविन्दः ''अरविन्द जोसफः'' संजायते। कैशोर्ये सरलचित्तः स मातरं सेवते, माता च सुतश्च प्राकृतभाषायां संलपतः (प्राकृतभाषान्तर-कारस्य नामाऽपि मुद्रितं कथाया अन्ते टिप्पण्याम्)। एवंविधा नूतनयुगीन कथावस्तु प्रस्तुवन्त्यः कथाः संग्रहेऽस्मिन् दृश्यन्ते।

शिल्पेऽपि क्रान्तिरासु कथासु स्पष्टा। अद्य पत्राचारः प्रेषणया (डाक) न भवति, ट्विटर-ह्वाट्स एप प्रभृतयः प्रकारा उद्भूताः। तेषां निरूपणं किमिति न भवेत् संस्कृते? एवंविधं संलापं स्मार्टफोन द्वारा ह्वाट्स एप विधया वर्णयन्ती कथा ''चतुरदूरभाषे आषाढः'' द्वितीये स्तबके मुद्रिताऽस्ति। चतुरदूरभाष इति स्मार्टफोनस्यानु-वादः, यथा ''धनलता'' मनीप्लांट शब्दस्यानुवादः। एका कथा धनलता शीर्षकं वहति। इत्थं नवीनं कथ्यं नवीनं शिल्पं च प्रस्तुवन्त्य इमाः कथा नूतनान् मार्गान् प्रदर्शयन्तीति शतशः साधुवादार्हो डॉ. ऋषिराज जानी।

इदमपि प्रमोदावहं यत्स्तबकद्वयीयकथानामनुवादो राजस्थानीयेन विदुषीद्वयेन कृतोऽस्ति। प्रथमस्तबक-कथानां हिन्द्यामनुवादः, अनुशीलनात्मकभूमिका, सम्पादनं च कोटानगरीयमहाविद्यालय-संस्कृत-विभागाचार्यपदमलङ्कुर्वत्या प्रो. डॉ. सुदेश आहूजा वर्यया कृतमस्ति, द्वितीयस्तबकस्य च जोधपुरविश्वविद्यालय-संस्कृतविभागाचार्यया प्रो. डॉ. सरोज कौशलवर्यया कृतमस्ति। इत्थं सभूमिकः, सानुवादश्चायं कथासंग्रहः सर्वथा नूतना दिशो दर्शयति। कथाकारः, सम्पादिकाद्वयं च वर्धाप्यतेऽस्माभिः। पुस्तके कुत्राऽपि कथाकारस्य, सम्पादिकाद्वयस्य च कश्चनाऽपि परिचयो न प्रकाशितः। अयमुल्लेखस्तु मया स्वपरिचयेनैव कृतः। अद्यत्वे सर्वत्र तादृशः संक्षिप्तः परिचयः प्रकाश्यते। मन्येऽग्रे प्रकाश्ये संस्करणे तथा क्रियेत। स्वागतार्हस्यास्य सङ्कलनस्य नूतनं संस्करणमपि शीघ्रमागच्छेदिति प्रार्थनाऽस्माकं परमेश्वरस्य चरणयोः।

**रक्तशाटीधारिणी माता (लघुकथासङ्कलनम्) कथाकारः डॉ. ऋषिराज जानी, सम्पादनं, हिन्द्यनुवादश्च प्रो. डॉ. सरोज कौशल, प्रो. डॉ. सुदेश आहूजा, प्रकाशकः ग्रन्थम्, 1033 नवी पोळ भवानपुरा पोळनी बाजूमाँ शाहपुर, अहमदाबाद पृ. सं. 160 मू. 150/-.**

# अस्माकं गुरवः

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

**अप्रतिमा सेवामूर्तिः**- सारगाच्छ्याश्रमे श्रीमतां गुरुमहाभागानामेकोन्य उज्वलो गुणः प्रकाशमागतः। ते तत्रत्यानां स्वामिनामखण्डानन्दमहाभागानां सर्वविधायां व्यक्तिगतव्यवस्थायां सेवायां च स्वं समर्पितवन्तः। तेषां वस्त्रप्रक्षालनं, स्नानं, तेषां कृते चायपेयनिर्माणं भोजन-व्यवस्थां, शयन व्यवस्थां च ते स्वयमेव कुर्वन्तिस्म। स्वामिनो वयोवृद्धाः अपि च अस्वस्था आसन्। यदा कदा सम्पूर्णायां रात्रौ जागरणं विधायापि निरलसया श्रद्धापूर्णया सेवया तेऽत्यन्तं प्रसन्नाः, प्रसन्नैः स्वामिमहाभागैस्तेभ्यो दीक्षादानं निर्णीतम्। दीक्षाग्रहणं कृत्वा गुरवो भावमग्ना अभवन्। तद्वर्णनं कुर्वद्भिस्तैः स्वयमेव कथितम्- असंख्यैर्जन्मभिः पश्चात् प्राप्तव्यं सौभाग्यमद्य मया प्राप्तम्। मे सम्पूर्णं शरीरं रोमाञ्चितमस्ति। एवं भासतेऽहं पूर्णमेव परिवर्तितोऽस्मीति। दीक्षाग्रहणस्य मंगलमयो दिवसः जनवरीमासस्य त्रयोदशः 1937 ई. आसीत्। आसीन्मकरसंक्रमणस्य मंगलमयी वेला। पश्चात् स्वामिचरणैरेवाशीः प्रदानपूर्वकं कथितं मयि ये गुणास्तान् गृहाण, त्वयि ये दोषास्तान् मह्यं देहि। तस्मिन् दिने स्वामिमहाभागैर्गुरुम् अमिताभमहाराजं च स्वसमीपे उपवेश्य रात्रौ सार्द्धत्रिवादनं यावदध्यात्मरहस्याः श्राविताः। एकस्मिन् दिने स्वामिमहाभागैः कथितमेवं भासतेऽस्य कृते तु कार्यमन्यत्प्रतीक्षां करोति। स्वस्मृतिः स्थिरा स्यादिति स्वामिमहाभागैः स्वकमण्डलुर्निजोप-करणानि च गुरुभ्यः प्रदत्तानि। कतिपयदिनानन्तरमेव-फर्वरीमासे 1937 ई. वर्षे प.पू. स्वामिमहाभागानां शरीरं पंचतातवे विलीनतमभूत्। पश्चाद् गुरवः बेलूरमठस्य रामकृष्णाश्रमे कतिपयदिनपर्यन्तं स्थित्वा अभिताभ-महाराजेन सह नागपुरे समागताः।

नागपुरे समागत्य गुरूणां जीवने सहसैव नूतनं परिवर्त्तनमभूत्। ते डाक्तरमहोदयैर्मिलितुं गताः। डाक्तरमहोदयैः कथितम् दीक्षा गृहीता, अथ किं विधास्यते। ''तपस्तप्तुमिच्छामि'', इत्युत्तरे डाक्तर-महोदयैः कथितम्- ''अहो इतोऽप्यधिकः स्वार्थः को भविष्यति। भवता स्वात्मनो मोक्षस्योपायश्चिन्तितः, अस्य घोरनिद्रायां सुप्तस्य हिन्दुसमाजस्य निद्रातो मोक्षं कः करिष्यति।'' श्रुत्वैव गुरुमहाभागानां कर्णावुत्थितौ, डाक्तरमहोदयानां शब्दास्तयोर्गुञ्जायमाना बभूवुः। डाक्तरमहोदयानां सान्निध्ये तैरतीव प्रेरणाप्रदं राष्ट्रसमर्पितं व्यक्तित्वमवलोकितम्। केनाप्याप्तपुरुषेणास्मिन् विषये प्रश्ने कृते गुरुमहाभागैः कथितम्-मम चिन्तनमध्यात्मना तुल्यमेव राष्ट्रसंगठनकार्यं प्रत्यपि प्रारम्भत एवासीत्। तत्कार्यं च संघे स्थित्वैवाधिकफलदायकरूपेण कर्तुं शक्यते इति मे विश्वासः। अतोऽहं संघकार्ये एव स्वं समर्पितवान्। एवं भासते विवेकानन्दस्य तत्वज्ञानेन कार्यपद्धत्या च मदीयमिदमाचरणं सर्वथा सुसंगतम्। अस्मिन् कार्ये च स्वशरीरं चन्दनवद् घर्षयन्तं डाक्तरमहोदयानां जीवनमपि गुरवः पश्यन्त एवासन्। श्रीमद्भिर्गुरुभिः 1938 ई. वर्षानन्तरं संघकार्यमेव स्वजीवनकार्यं स्वीकृतम्। डाक्तरमहोदयैः सह वसता स्वं सम्पूर्णमवधानं संघकार्यवृद्धावेव केन्द्रितमकुर्वन्। तेन डाक्तसर-महोदयानां चिन्तामुक्तिः संजाता।

**जन्मतो देशभक्ताः डाक्तरमहोदयाः**

डाक्तरमहोदयानां चिन्तामुक्तिः संजातेति वर्णितम्। तत्र के ते डाक्तरमहोदयाः का च तेषां चिन्तेति ज्ञातुं तेषां विषयेऽपि संक्षेपेण किञ्चिद् वर्णनं प्रासङ्गिकम्। तेषां पूर्णं नाम ''डा. केशव बलिराम हेडगेवार'' इत्यासीत्। त्रिषु

भ्रातृषु ते कनिष्ठतमाः आसन्। बाल्यादेव तेषां चेतसि देशभक्तेः स्वातन्त्र्यस्य च स्फुलिंगा उद्भवन्तिस्म। तेषु दिवसेषु सम्पूर्णदेशे गुञ्जायमानेषु ''वन्देमातरमुद्घोषेषु'' आन्दोलनेष्वपि च ते सम्मिलिता अभवन्। पश्चात् ते द्राक्तरोपाधिं प्राप्तुं कोलकातानगरे गताः। तेषु दिवसेषु कोलकाताप्रदेशः क्रान्तिकारिणां कार्यक्रमाणां केन्द्रम् आसीत्। कोलकातानगरे चतुर्वर्षाणां चिकित्साशास्त्राध्ययनेन सहैवेते क्रान्तिकारिणां पद्धतेः स्वातन्त्र्यप्राप्तौ तेषां योगदानादिविषय-कमप्यध्ययनं गम्भीररूपेण चक्रुः। नैतावदेव तेषां कार्येषु सक्रियतापूर्वकं साहाय्यमपि चक्रुः। क्रान्तिशिरोमणिना त्रैलोक्यनाथचक्र-वर्त्तिना द्राक्तरमहोदयानां सहयोगविषये कथितमपि यत् कोलकातानगरनिवाससमयेऽपि (युवावस्थायां) केशवराव-महोदयाः कथयन्तिस्म देशार्थं मर्त्तुमुद्यतैः कतिपयमुष्टिमात्रजनैः देशस्य वैदेशिकदासतायाः दृढायाः शृंखलायाः भङ्गः भवितुमशक्यः तदर्थं समाजस्य प्रत्येकस्मिन् जने स्वातन्त्र्यलालसा उत्पादनीया।

**संघस्य स्थापना-**

कोलकातानगरे द्राक्तरोपाधिमादाय नागपुरे परावृत्य च द्राक्तरमहोदयाः देशस्य स्वातन्त्र्याय श्रीमतां गान्धिमहाभागानां नेतृत्वे प्रचलितेष्वान्दोलनेषु सम्मिलिता अभूवन्। तदर्थं च कारागारेऽपि गताः। एतासु सर्वविधासु गतिविधिषु सम्मिलन्तोऽपि ते देशं सर्वदार्थ सर्वविधेभ्योऽन्तर्बाह्यसंकटेभ्यो मोचयितुं मार्गस्यान्वेषणार्थमपि चिन्तनं कुर्वन्तिस्म। गम्भीरचिन्तनानन्तरं तेऽस्मिन्निष्कर्षे सम्प्राप्ताः यदस्य देशस्य मूलरूपस्य हिन्दुसमाजस्यैव संगठनं करणीयमस्ति। तस्यैव पूर्त्यर्थं तैः 1925 ई. वर्षे विजयादशम्याः शुभपर्वणि राष्ट्रीयस्वयंसेवकसंघस्य स्थापना कृता। ते स्वयमपि अन्येभ्यः सर्वविधकार्येभ्यो मुक्ताः संभूय एकाग्रचेतसा संघकार्ये संलग्ना अभवन्। तेषां परिवारः पौरोहित्यस्यासीत्। अतिदीनावस्थायामासीदथापि द्राक्तरमहोदयैः चिकित्साव्यवसायो न कृतः। तैः सांसारिकजीवनं त्यक्तवा स्वसम्पूर्णोऽपि समयः संघकार्यार्थं प्रदत्तः।

संघस्थापनान्तरमष्टदशवर्षपर्यन्तं तेषामति मानवीयेन परिश्रमेण संघकार्यं तीव्रगत्या समस्तदेशव्यापकं भवितुं प्रारब्धम्। परं तेषां स्वास्थ्ये तीव्रगत्या पतनमपि प्रारब्धम्। अस्यानुभवेन स्वस्थाने संघकार्यदायित्वं कस्मै प्रदेयमिति चिन्तनमपि प्रारब्धम्। अनया दृष्ट्या गुरुमहाभागानामुपरि ध्यानं स्वाभाविकमेव। क्रमशः...

**ब्रह्मपुरी, जयपुरम्**

**प्रेरकप्रसङ्गशतकम्** **त्रिसप्ततितमः प्रसङ्गः**

# गुप्तदानम्

❑ **श्रीमती आराधना धर्माधिकारी**

टाटोपाख्यजमशेदजीकस्य कार्यालये कोलकतानगरे एकस्याः चिकित्सालयप्रबन्धकसमितेः सदस्याः सहायतां ग्रहीतुं सम्प्राप्ताः। तैरिदमपि कथितम्-यो हि दशसहस्राधिकं प्रदास्यति तन्नाम्नः शिलापट्टकमपि भवने नियोक्ष्यते येन दातॄणां कृते प्रेरणास्पदं स्यात्। सर्वं मौनेन श्रुत्वा टाटामहोदयेनैका महती राशिस्तेषां सम्मुखे प्रक्षिप्ता। गणकाः वारं वारं गणयन्तिस्म, कदाचिद्दश-सहस्राणि भवन्तिस्म कदाचिच्च पञ्चाशन्न्यूनान्येव सन्ति। सदस्यैः कथितम्-पञ्चाशदधिकदाने भवादृशां का हानिः। टाटामहोदयैः कथितम्-नाहं स्वस्य विज्ञापनमिच्छामि। गुप्तदानस्य महत्वमधिकं वर्तते। तेन प्रेरणाऽपि कथं मिलिष्यति भवद्भिस्तु दानदातृषु लोभ उत्पाद्यते। भवन्तः सत्कार्ये नियोजयन्त्यसत्कार्ये वा इति तु भवदधीनम्।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

बालोपयोगिनी जीवनवृत्तमाला

# भारतभूम्याः विभूतयः

❑ अविनाश शर्मा

## जयद्रथवधः

चक्रव्यूहमध्ये युद्धरतस्य अभिमन्युकुमारस्य वधं श्रुत्वा सर्वे पाण्डवा दुःखिताः बभूवुः। अभिमन्युकुमारस्य पिता अर्जुनः यदा संशप्तकेभ्यो युद्धं कृत्वा श्रीकृष्णेन सह परावर्तितोऽभूत् तदा अभिमन्युकुमारस्य निधनवार्ता तेन सविस्तरं सदुःखञ्च श्रुता। कौरवाणामासीदियम् अनीतिपूर्णा कृतिः। दुर्योधनस्य भगिन्याः पतिः सिन्धुदेशस्याधिपतिर्जयद्रथः अस्य अभिमन्युकुमारस्य निधने मूलकारणमासीत्। कुमारस्य व्यूहमध्ये प्रवेशानन्तरं यदा सर्वे पाण्डवाः तस्यानुगमनं कुर्वन्तो व्यूहमध्ये प्राविशन् तदा द्वारस्थः जयद्रथः शिववरदानप्रभावात्तान् तत्रैव रोधयामास। अनेनैव कारणेन निःसहायः शस्त्ररहितश्च अभिमन्युकुमारः द्रोण-कर्ण-कृपाचार्यादिभिः भटैः व्यापादितः।

कुद्धेनार्जुनेन प्रतिज्ञातं यत् यदि जयद्रथः कौरवाणामाश्रयं परित्यज्य मम शरणे नागमिष्यति तर्हि श्वः सूर्यस्यास्तचलगमनात्पूर्वमेवाऽहं तस्य वधं करिष्ये अन्यथा चेदहं अग्निमध्ये स्वदेहत्यागं विधास्यामि।

पाण्डवाः जयद्रथोपरि पूर्वत एव रुष्टा आसन्। पाण्डवा यदा वनवासमध्ये आसन् तदा एकदा काम्यवने एकाकिनीं द्रौपदीं विलोक्य तेन तस्याः पुरत अनुचितः प्रस्तावः रक्षित आसीत्। तेन तां बलपूर्वकमपहर्तुमपि चेष्टितम्। किन्तु मार्गे पाण्डवाः समुपस्थिता बभूवुः तदा तैः युद्धं कृत्वा द्रौपद्याः रक्षणम् सम्पादितम्। तदा भीमेन जयद्रथस्य प्रबला दुर्गतिः कृता आसीत्। तदा जयद्रथेन पाण्डवानां दासत्वं स्वीकृतमासीत्, किन्तु दयालुना युधिष्ठिरेण तस्य विमोचनं कारितम्।

अपमानितो दुःखितश्च जयद्रथः काम्यवनात्स्वगृहं न जगाम। हरिद्वारं गत्वा तत्रैव शिवस्य शरणं प्राप्य तेन तत्र उग्रं तपः कृतम्। प्रसन्नः शिवः यदा प्रकटितोऽभूत्तदा तेन सर्वेषां पाण्डवानां पराजयस्य वरः याचितः। अर्जुनं विना चत्वारः पाण्डवाः पराजिता भविष्यन्ति, अर्जुनस्तु नारायणाराधको नरावतारोऽस्ति सः पाशुपताख्यस्य दिव्यास्त्रस्यापि च धारी वर्तते अतः स संग्रामे शत्रुभिरपराजितोऽस्ति। एतादृशं वरं प्राप्य जयद्रथो गृहे प्रतिनिवृत्तोऽभूत्। चक्रव्यूहस्य द्वारे यदा भीमादयश्चत्वारः पाण्डवाः जयद्रथेन युद्धरता बभूवुः तदा ते सर्वे जयद्रथेन पराजिताः व्यूहभेदने अशक्ता अभूवन्।

अभिमन्युकुमारस्य निधनानन्तरं सव्यसाचिनः अर्जुनस्य प्रतिज्ञामुपश्रुत्य जयद्रथो भयभीतो बभूव। भीतो जयद्रथः गुरुद्रोणेन आश्वस्तः। तस्य रक्षार्थं कौरवैः शकटव्यूहरचना कृता। अर्जुनस्य प्रतिज्ञां ज्ञात्वा श्रीकृष्णेनोक्तम् 'यत् भवता अयं महद्दुस्साहसः कृतः नास्ति सुकरो जयद्रथस्य वधः।'

द्वितीयदिने श्रीकृष्णेन अर्जुनस्य रथः शकटव्यूहमध्ये जयद्रथस्य वधार्थं प्राविष्टः। दिवसपर्यन्तं तस्मिन् शकटव्यूहे विभिन्नैः भटैः सह तस्य भीषणं युद्धं बभूव। कौरवभटेषु अनवरत-तीक्ष्णबाण-

**प्रहारान् कुर्वन् सायंसमये जयद्रथस्य सम्मुखं जगाम। षड्भिः भटैः सुरक्षितो जयद्रथः तत्रासीत् श्रीकृष्णेन एका युक्तिर्विचारिता। सूर्यास्तस्य समय आसीत्। तेन श्रीकृष्णेन योगयुक्तेन भूत्वा सूर्यस्योपरि अन्धकारस्य विस्तारः कृतः। इदं विलोक्य कौरवैः विचारितं यदिदानीम् अर्जुनः स्वकृतप्रतिज्ञानुसारं अग्निप्रवेशं करिष्यति। असावधानो जयद्रथः यदा सूर्यं प्रति बद्धदृष्टिः बभूव तदा अर्जुनः स्वकीये गाण्डीवे शरसंधानं विधाय प्रहर्तमुद्यतोऽभूत्तदा श्रीकृष्णेनोक्तम् 'जयद्रथस्य पिता वृद्धक्षत्रः प्राप्तवरोऽस्ति यत् यदा कोऽपि जयद्रथमस्तकच्छेदं करिष्यति तदा जयद्रथमस्तकस्य भूपतनसमकालमेव प्रहर्तुः मस्तकस्यापि खण्ड-खण्डं भविष्यति।' अतः श्रीकृष्णस्य सम्मत्या अर्जुनेन जयद्रथस्य मस्तकं बाणेन भित्त्वा राज्ञः वृद्धक्षत्रस्य उत्सङ्गे निपातितम्। वृद्धक्षत्रः सन्ध्योपासने निमग्न आसीत्। जपं कृत्वा यदा स समुत्थितोऽभूत् तदा जयद्रथस्य मस्तकं तस्योत्सङ्गात्भूमौ पपात। तत्कालमेव वृद्धक्षत्रस्य मस्तकं खण्डखण्डं बभूव।**

**इत्थं यदा जयद्रथस्य वधः संजातः तदा श्रीकृष्णेन अन्धकारावरणं निरस्तम् कृतम्। दीप्तः सूर्यः पुनः सर्वेषां समक्षं दृष्टिपथमागतः। तदा कौरवाः स्वकीयस्य अक्षौहिणीसैन्यस्य धृतराष्ट्रस्य जामातुः जयद्रथस्य वधमपि विलोक्य परमदुःखिताः हताशाश्च बभूवुः।**

## जयद्रथ वध

चक्रव्यूह के बीच में युद्ध करते हुए अभिमन्यु कुमार के वध को सुनकर सारे पाण्डव दु:खित हुए। अभिमन्यु कुमार के पिता अर्जुन जब संशप्तकों से युद्ध करके श्रीकृष्ण के साथ लौटे तो अभिमन्यु कुमार के निधन की वार्ता उनने दुखित होकर सविस्तार सुनी। कौरवों की यह अनीति पूर्ण कृति थी। दुर्योधन के बहनोई सिन्धु देश के अधिपति जयद्रथ अभिमन्यु कुमार के निधन का मूल कारण था। कुमार के व्यूह के अन्दर प्रविष्ट होने के पश्चात् जब सारे पाण्डव उसका अनुगमन करते हुए व्यूह के अन्दर घुसे तो द्वार पर खड़ा जयद्रथ ने शिवजी के वरदान के प्रभाव से उनको वहीं रोक दिया। इसी कारण से नि:सहाय तथा शस्त्ररहित अभिमन्यु कुमार द्रोण, कर्ण, कृपाचार्य आदि योद्धाओं द्वारा मार दिया गया।

क्रुद्ध अर्जुन ने प्रतिज्ञा की कि यदि जयद्रथ कौरवों का आश्रय छोड़कर मेरी शरण में नहीं आएगा तो कल सूर्य के अस्ताचल गमन से पूर्व ही में उसका वध करूँगा। अन्यथा तो मैं अग्नि में प्रवेश करके अपना देह त्याग कर दूँगा।

पाण्डव जयद्रथ के ऊपर पूर्व से रुष्ट थे। पाण्डव जब बनवास में थे तब एकबार काम्य बन में अकेली द्रौपदी को देखकर उसने उसके समक्ष अनुचित प्रस्ताव रखा था। उसने उसका बल पूर्वक अपहरण करने की भी चेष्टा की। किन्तु मार्ग में पाण्डव आगए थे, तब उनने युद्ध करके द्रौपदी की रक्षा की थी। तब भीम ने जयद्रथ की प्रबल दुर्गति की थी। उस समय जयद्रथ ने पाण्डवों की दासता स्वीकार करली थी। किन्तु दयालु युद्धिष्ठिर ने उसको छुडवा दिया था।

अपमानित और दु:खित जयद्रथ काम्यबन से अपने घर नहीं आया। वह हरिद्वार गया और वहां शिव की शरण में जाकर उसने वहां उग्र तप किया। प्रसन्न शिव जब प्रगट हुए तो उसने सब पाण्डवों की पराजय का वर मांगा। अर्जुन को छोड़ कर सारे पाण्डव पराजित होंगे, अर्जुन तो

नारायण का नरावतार है वह पाशुपत नाम के दिव्य अस्त्र को भी धारण करता है। इसलिये वह युद्ध में शत्रु द्वारा अपराजित है। ऐसा वर प्राप्त करके जयद्रथ घर लौटा था। चक्रव्यूह के द्वार पर जब भीम आदि चारों पाण्डव जयद्रथ के साथ युद्ध करने लगे तब वे सब जयद्रथ से पराजित होकर व्यूह भेदन में अशक्त रहे।

अभिमन्यु कुमार के निधन के पश्चात् सव्यसाची अर्जुन की प्रतिज्ञा को सुनकर जयद्रथ भयभीत हो गया। भयभीत जयद्रथ को गुरु द्रोण ने धैर्य बंधाया। उसकी रक्षा के लिए कौरवों ने संकट व्यूह की रचना की। अर्जुन की प्रतिज्ञा को जान कर श्रीकृष्ण ने कहा 'कि तुमने यह बहुत दु:साहस किया है। जयद्रथ का वध करना आसान नहीं है।'

दूसरे दिन श्रीकृष्ण ने अर्जुन का रथ संकट व्यूह में जयद्रथ का वध करने को घुसाया। दिनभर उस संकट व्यूह में विभिन्न योद्धाओं के साथ उसका भीषण युद्ध हुआ। कौरव योद्धाओं के साथ लगातार तीक्ष्ण वाण प्रहार करते हुए अर्जुन सायंकाल के समय जयद्रथ के सम्मुख गए। छै योद्धाओं द्वारा सुरक्षित जयद्रथ वहां था। श्रीकृष्ण ने एक युक्ति सोची सूर्यास्त समय था। तब श्रीकृष्ण ने योगयुक्त होकर सूर्य के ऊपर अन्धकार का विस्तार कर दिया। यह देख कर कौरवों ने सोचा कि अब अर्जुन अपनी की हुई प्रतिज्ञा के अनुसार अग्नि में प्रवेश करेगा। असावधान जयद्रथ ने जब सूर्य की ओर देखा तब अर्जुन अपने गाण्डीव पर शर सन्धान करके प्रहार करने को सिद्ध हुआ तब श्रीकृष्ण ने कहा 'जयद्रथ के पिता वृद्धक्षत्र को वर प्राप्त है कि जब कोई भी जयद्रथ का मस्तक काटेगा तब जयद्रथ के मस्तक के भूमि पर गिरने के साथ ही प्रहार करने वाले के मस्तक का भी खण्ड-खण्ड हो जायेगा।' अत: श्रीकृष्ण की सम्मति से अर्जुन ने जयद्रथ के मस्तक को बाण से काट कर उसको राजा वृद्धक्षत्र की गोद में डाल दिया। वृद्धक्षत्र संध्योपासना में निमग्न थे। जप करके जब वे खड़े हुए तब जयद्रथ का मस्तक उनकी गोद से भूमि पर गिरा। उसी समय वृद्धक्षत्र का मस्तक खण्ड-खण्ड हो गया।

इस प्रकार जब जयद्रथ का वध हो गया तब श्री कृष्ण ने अन्धकार का आवरण हटा दिया। दीप्त सूर्य फिर से उसके सामने दृष्टि में आया। तब कौरव अपनी अक्षौहिणी सैन्य के और धृतराष्ट्र के जामाता जयद्रथ के वध को भी देख कर परम दु:खित और निराश हुए।

**किशनपोल बाजार:, जयपुरम्**


**देश के समस्त नागरिकों को होलिकोत्सव के पावन पर्व पर हार्दिक शुभकामनाऐं**



**कृष्णगोपाल राठी**

**दूरभाष: 9414041750**

**श्रीनाथजी का मंदिर, राठी धर्मशाला, धूला हाउस के पास, बापू बाजार, जयपुर**

# आधुनिकी शिक्षा मानवमूल्यञ्च

❑ डॉ. सुनीता शर्मा

उच्चशिक्षां विना न कस्यापि राष्ट्रस्य समाजस्य वा सर्वविधाभ्युन्नतिः प्रभवति। शिक्षायाः समुचित-प्रसारेणैव पुरा किल भारत-मिस्र-यूनान-रोम-चीन प्रभृतिदेशेषु समजायत भौतिकी, दार्शनिकी-सांस्कृतिकी च समुन्नतिः। परमद्यावधि नोपलब्धं शिक्षायाः चरमं प्रयोजनम्। यावत्समाजे मानवताया निष्कण्टकपन्था न भविष्यति, तावच्छिक्षया यथार्थप्रयोजनं नोपलप्स्यते। शिक्षाया लक्ष्यं स्पष्टं निर्धारणीयम्। तत्र शिक्षाया बहूनि तात्त्विकानि परिवर्तनानि विधातव्यानि।

शिक्षयैव जगति शाश्वतमानवमूल्यानां, मानवाधिकाराणां, समेषां विकासावसराणां सम्प्राप्तिः प्रतिष्ठा चैतेषां शीर्षसिद्धान्तानां सञ्जायते। लोकतन्त्रात्मकेऽस्मिन् राष्ट्रेऽद्यापि शोषण-परम्परा, उत्पीड़न-पंक्तिः, विषमतायाः चरमोत्कर्षः विपन्नानामल्पसंख्यकानां तिरस्कारः, उत्कोचसाम्राज्यं, भ्रष्टाचारविजृम्भणं, क्रियमाणेषु कर्त्तव्येषु नैराश्यं, चारित्रिकं पतनम् आचारविचारभक्ष्याभक्ष्येषु चौदासीन्यं स्थले-स्थले श्रूयतेऽवलोक्यतेऽनुभूयते च शिष्टैः। यावत्समाजे समेषामेतेषां निदानं विधाय मानवताया निष्कण्टक-पन्था न भविष्यति तावन्नूनमेव शिक्षाया यथार्थं प्रयोजनं नोपलप्स्यते।

अथ खलु समुद्घटिताः शतप्रायाः विश्वविद्यालयाः परस्सहस्राः महाविद्यालयाः विद्यालयाश्च, येषु चिकित्सा-साहित्य-राजनीत्यर्थनीत्यौद्योगिकी-वाणिज्य-कला-विज्ञान प्रभृतीनां विषयाणामध्यापनाय प्रशासनेन सम्पादिता नैके प्रयासाः। तैस्तैः शिक्षण-संस्थानैरधीत-विद्याः स्नातकाः साम्प्रतं विविधपदेषु कार्यमुद्वहन्ति। किं सर्वत्राधिकरणेषु भवन्तीदानीं सदैव निष्पक्षाः निर्विवादाश्च निर्णयाः? समासेन कथनस्यायमेवाशयः यद्यं खलु यत्र नियुक्तास्सन्ति प्रायशः सर्वे स्वार्थसाधनेऽहमहमिकया धावन्तः अविगणय्य परपीडामपहाय मानवीयनैतिकमूल्यं राष्ट्रीयोन्नत्यै सर्वथा बाधामुपस्थापयन्ति कथितञ्चापि भर्तृहरिणा-

**बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः।**
**अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम्।।**

(नीतिशतकम् मूर्ख पद्धति/3)

दैनन्दिनं क्षीयमाणं राष्ट्रियचरित्रं, बौद्धिकं ह्रासं, सामाजिकव्यावहारिकनैतिकसंकटञ्चावलोक्य नितरां दंदह्यते चेतः, वेपते च हृदयं महानुभावानाम्। मन्ये, सर्वत्र कर्त्तव्यपरायणाः शिष्टास्सज्जनाः सन्त्येव परन्तेऽपि अंगुलिगणनीया इत्यपि निश्चप्रचमेव। समुपराजायामस्यां राष्ट्रदुरवस्थायामापतितो महान् खलु प्रश्नः मनीषिणां मार्गदर्शकानां राष्ट्रकर्णधाराणाञ्च पुरस्तात्। किमेतैस्सर्वा-नुभूततथ्यैर्न सिध्यति वैयर्थ्यं वर्तमानशिक्षायाः?

सैद्धान्तिकरूपेण शिक्षाया उद्देश्यं जन-जीवनस्य सर्वाङ्गीणमुत्थानं, मानवातायास्संरक्षणार्थं समुचित-शिक्षामाध्यमेन सुयोग्यानां, समर्पितवृत्तिसहितानां कर्मठचरित्रवतां नागरिकाणां निर्माणमस्ति, येन

समाजे-

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःख भाग्भवेत्।।**

**''विद्ययाऽमृतमश्नुते।''**

**( ईशावास्योपनिषद् )**

**''असतो मा सद् गमय।**
**तमसो मा ज्योतिर्गमय।**
**मृत्योर्मा अमृतं गमय।''**

**( बृहदारण्यक उपनिषद् 1/3/28 )**

इत्यादि शाश्वतिकमानवमूल्यानां सर्वतोभावेन प्रतिष्ठा स्यात्। परमद्य तावन्नैतादृशी सरणिरवलोक्यते। को हेतुरत्र? कश्च प्रत्यवायः सम्प्राप्तः? किं शिक्षापद्धतिरेव दूषिताऽऽहोस्विदस्याः क्रियान्वय-नमेव दोषावहम्? सम्प्रति हि भारतीयशैक्षिकपरिवेशे जातं प्राधान्यं शिक्षायाः व्यवसायोन्मुखत्वस्य। सञ्जातमनिवार्यमुपकरणं राजनीतिरपि भातीयशिक्षा-विदामन्तेवासिनाञ्च। राष्ट्रीय-नेतृत्वे समर्पणशीलानां विवेकयुतानां त्यागप्रियाणाम् प्रतिभाजुषां, कर्मठ-कार्यकर्त्तृणां सति ह्रासे सम्प्राप्त एष कालः। शिक्षायामाबाल्यादेव चरित्रनिर्माणार्थं नैतिकशिक्षायां जायेतेति तावत्प्रथमः कल्पः। भारतीयजीवन-पद्धतौ समाजवादस्य संस्थापनाय जनमानसे वाञ्छितानां संस्काराणां परिवर्तनानाञ्च प्रामुख्येन शिक्षकच्छात्रयोः प्रतिष्ठापनं नूनमेवैकमन्यद् व्यावहारिकं तात्त्विकमाह्वानं भविष्यति। छात्रजीवनेऽभिनवाचार-संहितायाः प्रतिष्ठाऽपेक्षिताऽस्ति यस्याः मूलाधारप्राप्तविवेकानां यूनां लोकमतं भवेत्। तया संहितया सामाजिक-शीलस्यापि जायेतोन्नतेः स्तरः। शिक्षाप्रणाल्यां योग्यतायाः यथार्थं सम्मानमपरिहार्यं मूल्यमस्ति। अतः परीक्षणविधौ क्रमागतायाः व्यवस्थायाः स्थानेऽभिनवे साहसिके प्रयोगो विधेयः। आधुनिकपरिप्रेक्ष्ये सांस्कृतिकनृविज्ञानस्य पाठ्यक्रमः छात्रेभ्यो नितान्तमुपयोगी लक्ष्यते। येन मानववंशस्य यात्राविधौ सम्प्रति 'कुत्र वयं स्मः' इत्यस्य निरन्तरं मननं जायेत। भौतिक साधनानां सापेक्ष-माहात्म्यं वर्त्तते एव परं भौतिकसाधनबाहुल्येन न मानवस्य चरमो विकासः। आत्मानुचिन्तनप्रक्रियाया मानवीयोपलब्धौ सर्वतोऽधिकं महत्त्वमिति न तिरोहितं विद्वद्वरेण्येभ्यः। उक्तं च-

**आत्मानं नियमैस्तैस्तैः कर्षयित्वा प्रयत्नतः।**
**प्राप्तये निपुणैर्धर्मो न सुखाल्लभते सुखम्।।**

**( वाल्मीकि रामायण/अरण्यकांड 9/31 )**

विगतैः कतिपयैर्वर्षैरनैकवारं श्रोत्रपथमिदमायातं यद् भारतीयशिक्षणपद्धतावामूलचूलपरिवर्त्तनस्या-वसरोऽनुप्राप्त एव, किन्तु नाद्यावधि कैरप्यत्र रचनात्मकमुत्तदायित्वमुदवहत्। अतः धीमन्तः शिक्षाविदः विचारकाश्च सम्भूय कुर्युरुच्चैः।

शङ्खनादम् -

**''उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत''**

**व्याख्यात्री संस्कृते**
**सहायकाचार्यः**
**राजकीय मीरा कन्याविद्यालय, उदयपुरम्**
**23-24, विद्या नगर, सेक्टर-4**
**हिरण मगरी, उदयपुर**

# अभिधाशक्तिविषयेऽप्पयदीक्षिताशाधरभट्टयोर्मतसमीक्षा

❑ भोपालरामः रेबारी

शब्दशक्तिमधिकृत्य 'वृत्तिवार्तिकमि' त्याख्यो ग्रन्थोऽप्पयदीक्षितेन विरचितः। वृत्तिवार्तिकेऽप्पयदीक्षितस्य चिन्तनं प्रायेण अभिधाशक्तिं लक्षणाशक्तिं चैव विषयीकरोति। व्यञ्जनाया विषयस्तत्र स्वल्पोऽपि नास्ति। यद्यपि वृत्तिवार्तिकस्य प्रस्तावनापद्येनेदमनुमातुं शक्यते यत् वृत्तिवार्तिककारः पण्डितः अप्ययदीक्षितः व्यञ्जनाविषयमपि प्रतिपिपादयित्सुरासीत्–

**''वृत्तयः काव्यसरणावलंकारप्रबन्धृभिः।**
**अभिधा लक्षणा व्यक्तिरिति तिस्रो निरूपिताः।।**
**तत्र क्वचित्क्वचिद्वद्धै र्विशेषानस्फुटीकृतान्।**
**निष्टङ्कयितुमस्माभिः क्रियते वृत्तिवार्तिकम्।।''**[1]

अत्र दीक्षितमहोदयस्तिसृणामेव शब्दशक्तीनामुल्लेखं करोति तत्स्वरूपं निरूपयितुं च प्रतिजानाति। वृत्तिवार्तिकस्य प्रारम्भोऽभिधाशक्तिविषयेण भवति। अभिधाविवेचनप्रसङ्गे लोकव्यवहारपक्षमुपस्थाप्य सर्वप्रथमं काव्यप्रयुक्तशब्दानामपि लोकप्रयुक्तशब्दानामिव संकेतितार्थप्रत्यायकत्वं तेन संसाधितम्। अयं संकेतितार्थ एव वाच्यार्थसंज्ञया मुख्यार्थसंज्ञया वाऽभिधीयते। अभिधाया एवापरं नाम अयं 'शक्तिरिति निर्दिशति।' शक्तिरिति नामकरणे हेतुं दर्शयति यत् शब्दे स्वसंकेतितार्थं द्योतयितुं शक्तिर्भवति। संकेतनिहितेयं शक्तिर्नैयायिकानां मते ईश्वरेच्छाऽप्युक्ता। नैयायिकाः प्रवदन्ति यत् ईश्वर एव सर्वप्रथमं अमुकशब्देनामुगर्थस्य ग्रहणं कुर्यादिति संकेतविशेषं सृजति। शास्त्रप्रयुक्त पारिभाषिकशब्देषु संकेतपरिकल्पनं शास्त्रकृत्कृतं भवति। अतएव दीक्षितमहोदयेन परिभाषेयं प्रस्तुता–

**''शक्त्या प्रतिपादकत्वमभिधा''**[2] इति।

अर्थात् शक्त्या मुख्यया वृत्त्या प्रतिपादकत्वं संकेतगृहीतस्यार्थविशेषस्य बोधकत्वमेव अभिधा इत्येतन्नामकः शब्दार्थ विज्ञापको व्यापार विशेषः।

दीक्षितमहोदयस्य परिभाषेयं कैश्चिद्विद्वद्भिः सम्यगालोचिता। तथाहि–शक्तिश्चाभिधाचेत्येकस्यैव शब्दव्यापारस्य संज्ञाऽस्तीत्यस्यां स्थितौ शक्तिमाध्यमेन अर्थप्रतिपादनमभिधा भवतीत्याकारकोऽर्थः प्रत्याय्यते। एवं चेत् अभिधया प्रतिपाद्यमानेऽर्थेऽभिधा मन्तव्येति कथनं नार्थबोधकव्यापारविशेषस्य स्वरूपं स्पष्टयति। अस्मादेव कारणात् रसगङ्गाधरकारः पण्डितराजजगन्नाथः अस्या परिभाषाया: खण्डनं प्राबल्येन करोति।

पण्डितराजजगन्नाथ उल्लिखति यत् अभिधया केनचित् शब्दविशेषेण साक्षात् संकेतितस्य कस्यचिदर्थविशेषस्य ज्ञानं भवतीत्याकारके दीक्षितीये लक्षणे प्रयुक्तस्य 'प्रतिपादक' शब्दस्य तात्पर्यमस्ति तस्य ज्ञानस्य हेतुः। प्रतिपादकत्वं च केवलं शब्दनिष्ठं भवति इति चेत् प्रतिपादकत्वज्ञानमात्रेणार्थप्रतीत्यसम्भवात् प्रतिपादकत्वमभिधेति लक्षणमुचितं नास्ति। न चेत् कथमेतल्लक्षणं कृतम्? यदि प्रतिपादकत्वमित्यस्यार्थः प्रतिपत्यनुकूल व्यापार इति क्रियेत तर्हि स व्यापारः ज्ञातताया अनन्तरमेव वाच्यार्थप्रत्यायकत्वे सक्षमः स्यात्। अतएव पण्डितराजजगन्नाथोऽभिधाया: परिभाषणेऽस्य तथ्यस्य संकेतमावश्यकं मनुते यत् अर्थस्य शब्देन सह, शब्दस्य चार्थेन सह कश्चित्सम्बन्धविशेषोऽवश्यं भवति स एव च शक्तिर्नान्यः इति–

**''शक्त्याख्योऽर्थस्य शब्दगतः**
**शब्दस्यार्थगतो वा सम्बन्धविशेषोऽभिधा।।''**[3]

अभिधाशक्तिश्चेयं त्रिविधाऽभिमता–रूढिः योगः योगरूढिश्चेति। रूढिस्तत्र भवति यत्र कश्चिच्छब्दोऽखण्डशक्त्यैव कस्यचिदर्थस्य प्रत्यायकः स्यात्। तात्पर्यमिदमस्ति यत् सम्पूर्णस्य शब्दस्याखण्डशक्तिस्तस्य शब्दस्य अवयवानां पृथक्पृथगर्थावबोधनं विनैव अखण्डार्थप्रतीतिं जनयति तत्र रूढिसंज्ञकाऽभिधानाम्नी शब्दशक्तिर्भवति। अभिधाया द्वितीयः प्रकारो 'योग' इत्यस्ति। यत्र किमपि पदं केवलमवयशक्त्यैव सम्पूर्णपदस्य एकस्यैवार्थस्य प्रतीतिं जनयति तत्र योगाख्याऽभिधा शब्दशक्तिर्भवति। उक्तं च –

**''अखण्डशक्तिमात्रेणैकार्थप्रतिपादकत्वं रूढिः।''**[4]

**''अवयवशक्तिमात्रसापेक्षं पदस्यैकार्थप्रतिपादकत्वं योगः।''**[5]

अभिधायास्तृतीयः प्रकारो 'योगरूढिरि' त्याख्योऽस्ति। स तु यत्र पदस्यावयवशक्तिः समुदायशक्तिश्चेत्युभे अपेक्षिते भवतः। तयोः संयुक्तशक्त्यैव तत्र पदार्थो निष्पद्यते। यथा निर्दिष्टं दीक्षितमहोदयेन–

**''अवयवसमुदायोभयशक्तिसापेक्षमेकार्थ-**
**प्रतिपादकत्वं योगरूढिः।''[6]**

दीक्षितमहोदयः अभिधायाः त्रयाणाममीषां प्रकाराणां सोदाहरणं विवेचनं प्रस्तौति। पुनश्चाभिधाया विषये स्वविशिष्टाभिमतान्यपि स्थापयति। तद्यथा-

(1) कदाचित् कस्यचिद् योगरूढपदस्य प्रयोगेऽपि तच्छक्तिस्त्वयवार्थ एव नियन्त्रिता भवति। तदा उक्तार्थं प्रत्यायितुं पुनः समुदायार्थवाचकस्य रूढपदस्य प्रयोगः करणीयो भवति। यथा- **''कुर्यां हरस्यापि पिनाकपाणे- धैर्यच्युतिं के मम धन्विनोऽन्ये''**[7] इत्युदाहरणेऽत्र 'पिनाकपाणि' रिति पदं अवयवार्थ मात्र नियंत्रितत्वात् न शिवं बोधयितुं क्षमते/अवएव 'हरस्य' इति पदग्रहणं कृतम्। इदमेव पदान्तरं समुदायशक्त्या शिवं बोधयितुं क्षमते।

(2) यत्र संयोगादिभिरभिधाया नियन्त्रणं भवति तत्र विवक्षितार्थस्यैवोपस्थितिः स्यात् न तु अविवक्षितार्थस्य। कदाचिद् द्व्यर्थकपदप्रयोगे द्वयोरर्थयोः विवक्षितत्वात् प्राकरणिकाप्रकारणिकयोर्न कश्चिदपि सुनिश्चितो नियमः स्यात्। यथा 'सैन्धवमानये' त्यादौ अर्थावबोधो वक्तु- र्विवक्षाधीनः। अस्मिन् विषयेऽपि स्पष्टं निर्दिष्टं वृत्तिवार्तिके-

**''तद्रीत्या न कथंचिदपि प्रकरणाप्रकरणादि- नियमनं शक्यशङ्कम्। तस्मात् प्रस्तुताप्रस्तुतोभयपरे-ऽपि प्रस्तुताप्रस्तुतोभय वाच्यार्थेऽभिधैव वृतिः।''[8]**

(3) अप्राकरणिकेऽर्थे सर्वदाऽभिधैव शब्दशक्तिस्तत्प्र- त्यायकत्वं निर्वहति किन्तु प्राकरणिकार्थे कदाचिद् व्यञ्जनाऽपि भवितुमर्हति। विशेषेणालङ्कारध्वनिस्थले अलङ्कारसामान्यस्थले च भेदोऽयं स्पष्टतयाऽवलोकयितुं शक्यते।[9]

एवं दीक्षितमहाभागानां कृतमभिधाशब्दशक्तिचिन्तनं शास्त्रालोचनदृशा विशिष्टं विद्यते।

आशाधरभट्टस्तु अभिधानिरुपणे प्राचां मतैरधिकः प्रभावितोऽस्ति तथा हि तेन न्यायसिद्धान्त मुक्तावल्यां कथितं ''शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः'' इति मतं प्रति स्वसम्मतिं प्रस्तुवन्नेवोल्लिखति कोविदानन्दे-

**''शास्त्रादेर्ज्ञातसंकेतः प्रयोगेऽन्यपदान्वितः।**
**अर्थस्यान्वययोग्यस्य शब्दो वृत्यैव बोधकः।।''[10]**

भट्टमहोदया अपि अभिधायाः कृते शक्तिशब्दस्यैव प्रयोगं कुर्वन्ति-

**''एतास्तिस्रः पृथक् शक्तिर्लक्षणा व्यञ्जनाऽभिधा।**
**अलंकारविदां वाच्यलक्ष्यव्यंग्यार्थगोचरा।।''[11]**

कोविदानन्दे भट्टमहोदयैरभिधायास्त्रैविध्यं दीक्षिताचार्य सम्मतमेव प्रतिपादितमस्ति। तन्मतेन अखण्डशब्दे रूढिरभिधा भवति, खण्डकल्पिते शब्दे च योगाख्याऽभिधा भवति, उभयत्वसाकांक्षे च मिश्रा अर्थात् योगरूढिर्भवति। त्रैविध्यं प्रतिपाद्यापि स्वीयं विशिष्टाभिमतं दर्शयन्नसौ योगशक्तेर- नेकधात्वं स्वीकरोति-

**''शब्दावयवयोगेन योगशक्तिरनेकधा।**
**गुणाश्रया नीलकण्ठे मारमारे क्रियाश्रया।।**
**सम्बन्धजापि वाक्यादौ विचित्रा त्रिपुरद्विषि।**
**क्वचिद्रूढौ क्वचिद्योगे मिश्रा विश्रान्ति रिष्यते।।''[12]**

एवमाशाधरभट्टकृते अभिधाविवेचने अभिधास्वरूप- विषये केवलं प्रस्तुतिगता एव भिन्नताऽस्ति। भेदानां प्रस्तुतौ तु उभयोर्मतसाम्यमवलोक्यते।

आशाधरभट्टो व्यञ्जनां स्पष्टतः प्रतिपादयति, यथा-

**संकेतशक्यसम्बन्ध विभिन्नसहकारिणी।**
**वाच्यलक्ष्यातिरिक्तार्थधीहेतुर्वृत्तिरञ्जना।।**
**पञ्चाननो विजयते हिमवद्भूविहारकृत्।**
**अत्र व्यञ्जनयान्योऽर्थस्तत्साम्यं वा प्रतीयते।।**

इत्यादिना[13] तदित्थम् आशाधरभट्टस्य कोविदानन्दे अभिधादिवृत्तित्रयस्य साङ्गोपाङ्गं विवेचनं प्राप्नोति।

**पादटिप्पणयः**

1. वृत्तिवार्तिकम् (अप्पयदीक्षितः, चौखम्भाविद्या-भवनम्, वाराणसी, 1952), पृ. 1, 2. वृत्तिवार्तिकम्, पृ. 3
3. रसगंगाधरः (पंडितराज-जगन्नाथः, सम्पूर्णानन्द संस्कृत वि.वि. वाराणसी, 1977) पृ. 176
4. वृत्तिवार्त्तिकम् - पृ. 26, 5. वृत्तिवार्त्तिकम् - पृ. 1
6. वृत्तिवार्त्तिकम् - पृ. 2, 7. वृत्तिवार्त्तिकम् - पृ. 3
8. वृत्तिवार्त्तिकम् - पृ. 15, 9. वृत्तिवार्त्तिकम् - पृ. 16
10. कोविदानन्दः (आशाधरभट्टः, इन्दु प्रकाशन, दिल्ली, 1973, अभिधावृत्ति विचारः, 40
11. कोविदानन्दः '' '' अभिधावृत्तिविचारः, 43
12. कोविदानन्दः '' '' अभिधावृत्तिविचारः, 49, 50
13. कोविदानन्दः व्यञ्जनानिरूपणम् 1, 6

**शोधछात्रः,**
**जयनारायण व्यास विश्वविद्यालयः, जोधपुरम्**

# वर्तमान-युगे संगणकस्य उपयोगित्वम्

❑ जितेन्द्रकुमार पारीक

कम्प्यूटर शब्द: आंग्लभाषाया: गणनार्थकात् कम्प्यूटरशब्दात् निष्पद्यते अत: कम्प्यूटरस्य कृते संगणक शब्द: प्रयुज्यते। आधुनिकेषु आविष्कारेषु कम्प्यूटरस्य विशिष्टं महत्वं वर्तते। वर्तमान-युग: संगणक-युग इति निगद्यते। संगणकेन मानव-जीवने नवीना क्रान्तिर्वि-हिता। संगणकस्य यादृशी तीव्रा प्रगति: संलक्ष्यते न तादृशी प्रगति: अन्यस्या: कस्या अपि क्रान्ते: संलक्ष्यते। प्रारम्भकाले अस्य उपयोग: केवलं गणनाकार्ये समभवत् परन्तु साम्प्रतम् अस्योपयोग: प्राय: सर्वेषु कार्येषु अनिवार्यतां धत्ते। साम्प्रतं कम्प्यूटरस्य उपयोगो यन्त्राणाम् आकार प्रकारनिर्धारणे भवनानां निर्माण-प्रक्रियायाम् ऋतुनिर्देशने विमानादीनां दिशा-निर्देशने, रेल-विमानादिषु आरक्षणकार्ये, रोगाणां सूक्ष्मपरीक्षणे विश्लेषणे च वैज्ञानिके शोधकार्ये, वाणिज्य-व्यवसाये, वेतन-गणनायाम्, कार्यालये एवमेव बीमा-शेयर-प्रभृतिषु उद्योगेषु, शिक्षाक्षेत्रे, मनोरञ्जनविधौ ललित कला-कार्य-कलापे महत्वपूर्णा भूमिका वर्तते कम्प्यूटरस्य।

सर्वप्रथमं सांख्यिकीकम्प्यूटरस्य निर्माणं पेंसिलवानिया विश्वविद्यालये 1946 ईसवीये अभवत्। तदा एतस्य भार: त्रिंशत् टन-परिमित आसीत्। साम्प्रतं कम्प्यूटर: अतिद्रुतगत्या विकासं कुर्वन् लोकस्य उपयोगितां साधयति। आकार प्रकार-दृष्ट्या कार्यक्षमतां चाश्रित्य कम्प्यूटर: चतुर्वर्गेषु विभाज्यते।

(1) मेन फ्रेम-कम्प्यूटर (2) मिनि कम्प्यूटर (3) माइक्रो-कम्प्यूटर (4) सुपर कम्प्यूटर

(1) मेन फ्रेम-कम्प्यूटर: - एष संगणको महतीं क्षमतां धत्ते अत्र अनेके जना: कार्यं कर्तुं शक्नुवन्ति। एते संगणका: उपकेन्द्रै: सह संयोजनेन माइक्रोवेव माध्यमेन भू-उपग्रह-संचारव्यवस्थायाम् वायुयान-आरक्षणे, रेलयान आरक्षणे च प्रयुज्यन्ते। एते बहुमूल्या: भवन्ति।

(2) मिनि कम्प्यूटर: एष मध्यश्रेण्या: भवति। एते संगणका: बीमा, बैंक-होटलादिषु उपयुज्यन्ते।

(3) माइक्रो-कम्प्यूटर: एष साम्प्रतं सर्वाधिकं प्रयुज्यते अत्रैको जन: कार्यं कर्तुं प्रभवति। एते संगणका: लघ्वोऽल्पमूल्यकाश्च भवन्ति। व्यक्तिगतकार्येषु उपयोगाद् एते संगणका: (Personal Computer P.C.) नाम्ना निर्दिश्यन्ते। एते लघ्वाकारा अपि उपलभ्यन्ते। आकार-दृष्ट्या लघवोऽप्येते कार्यदृष्ट्या महतीं क्षमतां दधति।

(4) सूपर कम्प्यूटर - एते आकारदृष्ट्या विशाला भवन्ति कार्य-दृष्ट्या एते अन्यसंगणकापेक्षया तीव्रतमा भवन्ति। एतेषु गणनाकार्यम् एकत्रैव सर्वं संपाद्यते शिक्षाक्षेत्रे संगणकानां बहुविधा उपयोगिता। संगणकानां साहाय्येन जटिलसमस्यानां निराकरणं सरलतया संभवति। प्रशिक्षण-कार्येऽपि संगणकानाम् उपयोगो भवति। शोधकार्येऽपि संगणकानाम् उपयोगिता महत्वपूर्णा वर्तते। विविधविषयाणां स्वयं शिक्षणेऽपि संगणकानाम् उपयोगो विधीयते। सर्वमपि पाठ्यं विभज्य संगणके स्थाप्यते, तच्च सर्वं पाठ्यं क्रमश: उपतिष्ठति। एवम् अनेका विधा: संगणकमाध्यमेन शिक्षितुं शक्यन्ते। एवं विधा (All Computer Assisted Learning), (All Computer Aided Instruction) इति च नाम्ना निर्दिश्यन्ते।

परीक्षाकार्येषु अपि संगणका बहुधा प्रयुज्यन्ते। परीक्षातिथिनिर्धारणे परीक्षाया आयोजने, परीक्षापरिणामे संगणकेन परीक्षापरिणामप्रकाशने च संगणकानां महती भूमिका। पुस्तकालय-विषयिका सर्वाऽपि सूचना संगणक-माध्यमेन सरलतया प्राप्तुं शक्यते। पुस्तक-प्रकाशने पुस्तकानां व्यवसाये च संगणकानाम् उपयोगो महत् सौविध्यं विदधाति। इलेक्ट्रिक पुस्तकप्रकाशनेन

पुस्तकानाम् उपलब्धौ सौविध्यं भविष्यति। तेषु साइट-माध्यमेन इलेक्ट्रानिक रूपेण पुस्तकं प्राप्तुं शक्यते।

वैज्ञानिक-शोध-कार्येषु संगणकानां महत्वपूर्णं योगदानं वर्तते। वैज्ञानिकं शोध कार्यं निरन्तरं प्रसरति। तत्र गणनायां जटिलतायाः संगणक-माध्यमेन समाधानं भवति। भौतिक-विज्ञाने रसायन-विज्ञाने, भूगर्भ-विज्ञाने, गणितशास्त्रे, कृषिविज्ञानादिषु च संगणकस्य प्रयोगेण महती प्रगतिः संलक्ष्यते। भैषज्यविज्ञाने, सामाजिक-विज्ञाने, मानवशास्त्रादीनां शोधकार्येषु संगणकस्य उपयोगः प्रतिदिनं वर्धते। कम्प्यूटरमाध्यमेन विशाल-भवनानां, सेतूनां, वायुयानानाम् आदर्श-चित्रं सारल्येन प्रस्तूयते।

ललितकला-क्षेत्रेऽपि संगणको नूतनां संभावनां जागरयति। संगणकः संगीत-प्रक्रियायां, मूर्ति-निर्माणेऽपि विविधं साहाय्यम् आचरति। क्रीडाक्षेत्रे संगणको नूतनां संभावनां प्रस्तौति। कम्प्यूटर-माध्यमेन विविधाः क्रीडाः हॉकी फुटबाल-क्रिकेट-प्रभृतयः दूरदर्शन-चित्रपटे द्रष्टुं शक्यन्ते। विविध-क्रीडानां सजीवं प्रसारणं संगणक माध्यमेन संभाव्यते।

चिकित्साक्षेत्रे संगणकानाम् उपयोगो महत्वपूर्णां भूमिकां निर्वहति। आतुराणां परीक्षणम् उपचारक्रिययैव सह शल्यक्रियाऽपि संगणकानां प्रयोगेण अनुष्ठीयते। मस्तिष्कस्य चित्रनिर्माणे कैट स्केन (Computerised Arial Tomography) पद्धतिः प्रयुज्यते।

व्यापार-क्षेत्रेऽपि संगणकानाम् उपयोगः प्रतिपलं वर्धते। कार्मिकवेतन-गणना, कार्मिक-प्रबन्धनम्, भाण्डागार-नियन्त्रणं संगणकमाध्यमेन संपाद्यते। व्यापारिक-संस्थानाम् आय-व्ययादि-संकलनम्, दैनिक-वेतन-गणनातिरिक्तम्, वार्षिक-वेतन-निर्धारणा-दिकं च संगणक-माध्यमेन सारल्यं भजते, संगणकस्य प्रयोगेन प्रबन्धक-व्यवस्था अतीव सरला संजाता।

साम्प्रतं संगणकस्य प्रयोगः संस्थानां कृते, बीमा-शेयर प्रभृति-कार्येषु अनिवार्यत्वं धत्ते। बैंक प्रभृतिषु उपभोक्तृणां संख्या प्रतिदिनं वर्धते। अतः वित्त-प्रबन्धने काठिन्यम् अनुभूयते। तस्य निराकरणार्थं संगणकस्य उपयोग आवश्यको भवति। औद्योगिकप्रतिष्ठानेषु संगणकानां प्रयोगेण उत्पादन-वृत्तम्, यंत्रसंचालनम्, वस्तूनां गुणवत्तानिर्धारणं सरलं भवति। संगणकानाम् उपयोगेन एकस्मिन् एव स्थाने स्थित्वा सर्वस्य यन्त्रजालस्य संचालनं नियन्त्रणं च संभवति।

अन्तरिक्ष-प्रौद्योगिकी-क्षेत्रे यादृशी प्रगतिः संलक्ष्यते सा संगणक-प्रयोगेण असंभवाऽपि संभवा संजाता। अन्तरिक्ष-यानानां प्रक्षेपणं, नियन्त्रणं, सूचना-संकलनम्, तद्विश्लेषणं च संगणकस्य प्रयोगेणैव संभवमभूत्। भूगर्भ-विज्ञाने, खनिज-विज्ञाने, ऋतुविज्ञाने च प्राप्तसामग्री विश्लेषणेन बहुविधा नूतनाः सूचनाः प्राप्यन्ते।

यातायात-क्षेत्रेऽपि संगणकानाम् उपयोगो बहुमूल्यः सिध्यति। रेल-यानेषु आरक्षणव्यवस्था, यानानां संचालनादिकं च भवति। एक-स्थानत एव सर्वोऽपि यात्रा-कार्यक्रमः आरक्षण-पद्धत्या संभाव्यते।

दूरसंचारक्षेत्रे संगणकानां प्रयोगेण महत् परिवर्तनं संलक्ष्यते। साम्प्रतं सर्वाऽपि टेलीफोन-एक्सचेंज-व्यवस्था संगणकानां माध्यमेनैव विधीयते। इन्टरनेट, ई-मेल, ई-कामर्स-प्रभृतयः संगणकस्य प्रयोगेण नूतनां क्रान्तिं विदधति।

कम्प्यूटर-संबद्धा इन्टरनेट-प्रणाली महासागरवद् वर्तते। सर्वस्मिन् जगति यत् किंचिज् ज्ञानं विज्ञानं, शोध-संबद्धकार्यजातं च वर्तते, तत् सर्वम् एकत्रैव प्राप्तुं शक्यते।

एवं एतद् वक्तुं शक्यते यत् साम्प्रतं संगणकस्य उपयोगिता बहुविधा वर्तते। उन्नत्यै, प्रगत्यै, विकासाय च संगणकानाम् उपयोग आवश्यकः।

**शोधच्छात्रः**
**राष्ट्रिय संस्कृत संस्थानम् जयपुर परिसरः**

# सर्वनामपरामृश्यस्य सर्वनाम्नाऽवचनम्

❑ सीमा चौधरी

शब्दार्थशरीरात्मकस्य काव्यस्यात्मा रसः। रामायणादारभ्य सर्वेषु महाकविप्रबन्धेषु रस एव जीवातुभूतः। स च रसो विभावानुभावव्यभिचारिणाम् औचित्येन काव्ये सन्निवेशात् सिद्ध्यति। विभावादिसंयोजनात्मा रसाभिव्यक्त्यव्यभिचारी कवेः कर्म काव्यमिति वदन् व्यक्तिविवेककारः सिद्धान्तममुं प्रतिष्ठापयति। केवलसंज्ञायाम् आनन्दवर्धनेन सह तस्य विमतिः। प्राणभूतस्य रसस्य प्रतीतौ ये विघ्नकारिणः ते सर्वेऽपि काव्ये दोषाः अत एव हेयाश्च।

विवक्षितरसादिप्रतीतिविघ्नविधायित्वं नामानौचित्यसामान्य-लक्षणम्। इदञ्च अर्थविषयं शब्दविषयञ्चेति द्विविधं भवति। तत्र विभावादीनाम् अयथायथं रसेषु यो विनियोगस्तन्मात्रलक्षणं प्रथमम् आनन्दवर्धनेन समग्रतया प्रतिपादितम्। शब्दविषयञ्च तत् विधेयाविमर्शः, प्रक्रमभेदः, क्रमभेदः, पौनरुक्त्यं, वाच्यावचनञ्चेति बहुविधम्। वृत्तस्य दुःश्रवत्वमपि शब्दानौचित्यरूपेण परिगणितम्। यतो हि वृत्तानामपि अनुप्रासादेरिव शब्दालङ्कारत्वं तेनाङ्गीकृतम्। विवक्षितरसप्रतिपादने वृत्तस्यापि स्थानमस्तीति अस्यापूर्वः सिद्धान्तः।

महिमभट्टः व्यक्तिविवेके अनौचित्यविचारक्रमे वचनस्यानौचित्यमन्तिमं विचारयति। द्वितीयविमर्शस्य प्रारम्भे अनौचित्य-प्रकाराणां नामत उल्लेखावसरे वाच्यावचनमिति अन्तिमं निर्दिशति। परं चतुर्णामपि अनौचित्यानां निरूपणानन्तरं ''वाच्यस्यावचनं यथा'' इति पञ्चमस्य असमासेन निर्देशो विधीयते। अनेन च अवाच्यस्य वचनमपि अस्मिन्नेवान्तर्भवतीति सूचितं भवति। नञर्थकस्य अकारस्य वाच्यमिति वचनमिति चोभयत्र योजयित्वा व्याख्यानेन अयमर्थः प्रतीयते।

तत्र प्रथमस्तावत् प्रभेदो यथा–

**''कनकनिकषस्निग्धा विद्युत् प्रिया न ममोर्वशी''**[1] इति। अत्र प्रत्यक्षेण भ्रान्तौ निवृत्तायां विद्युतः सन्निकृष्टार्थवाचिना इदमा परामर्शः अपेक्षितः। तस्मिन् वाच्ये यत्तस्य अवचनं स वाच्या-वचनं दोषः।

यथा च–

**कमलमनम्भसि कमले कुवलयमे-**
**तानि कनकलतिकायाम्।**
**सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम्।।''**[2]
इति।

अत्र च द्वितीयकमलार्थः सर्वनामशब्देन वाच्यः। पूर्वं प्रक्रान्तस्य कमलस्य अनन्तरं तत्परामर्शिना सर्वनाम्ना एव वाच्यत्वं युज्यते। तस्य च यत् कमलशब्देन वचनं स वाच्यवाचनं दोषः। अयं पौनरुक्तस्य विषय इति पूर्वं प्रदर्श्य इदानीमत्र वाच्यावचनत्वप्रदर्शनेन एतेषामनौचित्यप्रकाराणां परस्पर-विषयत्वम् महिमभट्टस्य सम्मतमासीदित्यवगन्तुं शक्यते।

**''सर्वनामपरामर्शयोग्यस्यार्थस्य यत्पुनः।**
**स्वशब्देनाभिधानं सा शब्दस्य पुनरुक्तता।।''**[3] इति।

इदानीं कथयति–

**''सर्वनामपरामर्शविषये योऽर्थवस्तुनि।**
**स्वशब्दवाच्यतादोषः स वाच्यावचनाभिधः।।''**[4]
इति।

एकस्मिन्नेव विषये अनौचित्यद्वयं व्याख्याभेदेन प्रकाशितं वर्तते।

अपि च–

**'द्वयं गतं संप्रति शोचनीयतां समागमप्रार्थनया कपालिनः।'** इत्यत्र कपालिशब्दस्य अर्थत्रयं शक्यते। अयं धर्मिधर्मोभयार्थवृत्तिः संज्ञिमात्रं वा प्रत्याययेत् कपालसम्बन्धकृतं वा गर्हिततत्वम् उभयमपि वा इति। तत्र प्रथमस्यार्थस्य स्वीकारे गर्हिततत्वाद्यर्थप्रतीतये अपरः

कपालिशब्दः अवश्यमपेक्षितः। यदि कपालिशब्देन कपालसम्बन्धकृतं गर्हिततत्वमेव प्रतीयते चेत् तस्य आश्रयभूतस्य शङ्करस्य प्रतीतिः तत्पर्यायपदप्रयोगेण सर्वनाम्ना वा स्यादिति तयोरेकतरस्य प्रयोगः अवश्यमपेक्षितः।

**''सततमनङ्गोऽनङ्गो न वेत्ति परदेहदाहदुःखमहो।**
**यदयमदयं दहति मामनलशरो ध्रुवमसौ न कुसुमशरः।।''**[5]

इत्यत्र अनङ्ग इति द्विवारमुक्त्वा धर्मिधर्मोभयमर्थं पृथक्पदाभ्याम् उपस्थापितम्। कदाचित् एतद् पर्यायेणापि प्रयुक्तं दृश्यते। यथा कुर्यां हरस्यापि पिनाकपाणेरित्यादि। अत्र हरस्येति पर्याय-शब्देनोपात्तस्यार्थस्य पिनाकपाणित्वं धैर्यच्युतेरशक्यकरणीयतायामार्थो हेतुः। अन्यथाऽत्र पुनरुक्तिप्रसङ्ग।

अस्यैवार्थस्य कदाचित् सर्वनाम्नापि दृश्यते। यथा–

**''दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः।**
**विरूपाक्षस्य जयिनीस्तास्तुमो वामलोचनाः।।''**[6]

सर्वनामशब्देन विशेष्यप्रतीतिः वामलोचनाशब्देन विशेषण प्रतीतिश्च जायते। तेनात्र प्रकृतेः कपालिनः इति एकेनैव शब्देन प्रयुक्तेन धर्मिधर्मोभयबोधः न भवत्येव। अत्र एकस्यैव कपालिशब्दस्या-वृत्तिमन्तरेण उभयार्थ-प्रतीतिर्न जायत इति वाच्यावचनमात्र दोषः तेनात्र– **''द्वयं गतं सम्प्रति तस्य शोच्यतां समागमप्रार्थनया कपालिनः।''** इति पाठः वरम्।

यत्र अन्यस्य अलङ्कारस्य विषये अलङ्कारान्तर-निबन्धः सोऽपि वाच्यावचनं दोषः। तथा हि समासोक्ति-विषये श्लेषस्य, श्लेषस्य विषये उपमायाः, रूपकस्य विषये उपमायाश्च निबन्धनं महाकविनिबन्धेषु दृश्यते। अत्र राजशब्दः उभयार्थत्वात् शशिनमपि आह। अतः शशिनम् इति पदेन विनापि केवलं राजानमिव जलनिधिश्चचाल इत्यनेन अनयोरुपमानोपमेयभावः श्लेषमहिम्ना प्रतीयते। इवशब्दश्च राजपदस्य चन्द्रार्थबोधकत्वे कारणं भजते। एवं श्लेषे वाच्ये तस्य यद्वचनं दोषः। एवमेव–

**''तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।**
**दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव।।''**[7]

इत्यत्र श्लेषविषये रूपकमासूत्रितमनादृत्य उपमोप-निबद्धा। तद्यथा–'राजेन्दुः इन्दुरिव प्रसूत' इति। अत्र यदि 'तदन्वयाब्धौ राजा प्रसूत' इति स्यात्तदा श्लिष्टतया राजशब्दस्य श्लेषविषयता स्यात्। यदि तत्र राजेन्दुः प्रसूत इति स्यात्तदा राजा एव इन्दुः इति रूपकं स्यात्। परं तौ अपि विहाय कविना ''क्षीरनिधौ इन्दुरिव राजेन्दुः प्रसूतः'' इति उपमा समाश्रिता तत्र उपमापेक्षया रूपकस्य रूपकापेक्षया च श्लेषस्य पूर्वत्वम्। श्लेष एव चमत्कारस्य मूलम् इति श्लेषविषये उपमा कृता सा अनुचितैव इति वाच्यावचनं दोषः। रूपकस्य विषये उपमाया उपनिबन्धो यथा–

**''ततो द्रुतं वैरमदाभितप्तः सोऽतीव रम्याद् भवनाद्रिकुञ्जात्।**
**विनिर्ययौ दानवगन्धहस्ती महाद्रिकुञ्जादिव गन्धहस्ती।।''** इति।

**सन्दर्भग्रन्थाः**


१. व्यक्तिविवेकः, चौखम्बा संस्कृत संस्थानम्, तृतीयं संस्करणम्, वि.सं.-2039 द्वि. वि., पृ. सं.-387

२. व्यक्तिविवेकः, चौखम्बा संस्कृत संस्थानम्, तृतीयं संस्करणम्, वि.सं.-2039 द्वि. वि., पृ. सं.-387

३. व्यक्तिविवेकः, चौखम्बा संस्कृत संस्थानम्, तृतीयं संस्करणम्, वि.सं.-2039 द्वि. वि., पृ. सं.-388

४. व्यक्तिविवेकः, चौखम्बा संस्कृत संस्थानम्, तृतीयं संस्करणम्, वि.सं.-2039 द्वि. वि., पृ. सं.-387

५. व्यक्तिविवेकः, चौखम्बा संस्कृत संस्थानम्, तृतीयं संस्करणम्, वि.सं.-2039 द्वि. वि., पृ. सं.-388

६. व्यक्तिविवेकः, चौखम्बा संस्कृत संस्थानम्, तृतीयं संस्करणम्, वि.सं.-2039 द्वि. वि., पृ. सं.-389

७. व्यक्तिविवेकः, चौखम्बा संस्कृत संस्थानम्, तृतीयं संस्करणम्, वि.सं.-2039 द्वि. वि., पृ. सं.-199



**शोधच्छात्रा, साहित्यविभागः,**
**रा. सं. सं., जयपुरपरिसरः, जयपुरम**

नारी-स्तम्भः

# संयुक्तपरिवारो दिव्योपहारो वा

❑ डॉ. राजेश्वरी भट्ट

विश्वस्मिन् विश्वे प्रशस्ता क्रान्तदर्शिभिः वैदिक-ऋषिभिः मानश्रेयसे उपायनीकृता संयुक्तपरिवार-व्यवस्था अद्य अन्ताराष्ट्रियस्तरे स्पृहणीया वरणीयाऽनु-करणीया च प्रतीयते। वैदिककालादेव भारतभूमौ पल्लविता पुष्पिता सुप्रतिष्ठिता च संयुक्तपरिवारप्रथा परिवारेषु स्वर्गकल्पसुखं वितनोति। परम्परागतभारतीय परिवारेषु पुत्र-पिता-पितामह-प्रपिता-महादीनां परिवारः सहैव निवसति। प्रपौत्रस्य जन्म समये भारतीय-परिवारेषु विशालमहोत्सवस्य आयोजनं भवति। अत्र प्रपौत्रस्य जन्म प्रपितामहस्य कृते स्वर्गसोपानमिव मङ्गलमयं मन्यते। भवतु सुखं दुःखं वा परिवारस्य सर्वेऽपि सदस्याः समानरूपेण अनुकूलवेदनीयस्योप-भोगं प्रतिकूलवेदनीयस्य समाधानञ्च कर्तुं सन्नद्धाः भवन्ति। उत्सवेषु व्यसनेषु वा परिवारस्य सर्वेषां सदस्यानां अहम्भूमिका भवति। भवननिर्माणे इष्टिकानामिव परिवारे सदस्यानां मध्ये अन्योन्याश्रय सम्बन्धो भवति। अग्रजानुजानाञ्च मध्ये समुचित-आचार-विचार व्यवहारः परिवारे समरसतां सिञ्चति। पितापुत्रयोः पतिपत्न्योः भ्रातृभगिन्योश्च मध्ये कीदृशो व्यवहारो भवेदिति एतेषु सम्यक्रूपेण प्रतिपादितम्। कथितञ्च-

अनुव्रतः पितुः पुत्रो माता भवतु संमनाः  
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्  
मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा।  
सम्यञ्चः सुव्रता भूत्वा वाचं वदत भद्रया

अथर्ववेद, 3/30/2.3

ऋग्वेदस्य दशममण्डले विवाहानन्तरं नवयुगलं प्रति आशिषं व्याहरन् वैदिकऋषिर्नवयुगलाय सुखददाम्पत्य-जीवनं दीर्घमायुष्यं पुत्रैर्नप्तृभिः सह संयुक्तपरिवारे चिरनिवसनञ्च अभिलषति। कथितञ्च-

इहैव स्तं मा यौष्टं विश्वमायुर्व्यश्नुतम्  
क्रीड़न्तौ पुत्रैर्नप्तृभिः सह मोदमानौ स्वेगृहे

ऋग्वेद 10/85/42

पारिवारिक सम्बन्धानां मर्माणि ज्ञातुं वाल्मीकि-रामायणं आदर्शग्रन्थरत्नं वर्तते। वेदेषु विहिता पारिवारिकसम्बन्धानामाचारसंहिता रामायणे आदर्श-पात्राणां माध्यमेन सर्वथा पालिता। पुत्ररामस्य वियोगे पितुर्दशरथस्य प्राणाहुतिः पुत्रप्रेम्णः पराकाष्ठा वर्तते। एवमेव पितुर्वचनानां रक्षायै चतुर्दशवर्षेभ्यो घोरे वने वासः पितृभक्तेरनन्योदाहरणं वर्तते। रामेण सह हिंस्रपशुभिव्याप्तं घोरवनं गन्तुं दृढसंकल्पवती सीता महात्यागेन अनन्यपतिप्रेम्णा अद्य नारीणां कृते आदर्शभूता वर्तते।

रामस्य परमोदाराः भ्रातरः परस्परं भावयन्तो एकैकस्य कृते प्राणोत्सर्गाय तत्पराः दृश्यन्ते। किन्तु स्वार्थपरायणेऽस्मिन् युगे वैश्वीकरणस्य प्रबल-प्रभञ्जने संस्कृतिविटपस्य शाखाः प्रकम्पिता दृश्यन्ते। प्रभञ्जनेऽस्मिन् संयुक्तपरिवारस्यावधारणा शिथिला जाता। संस्कृतिमूल्यानां ह्रासेन परिवारेषु प्रसादस्य स्थानं अवसादेन लब्धं। वैदिकर्षिभिः संप्रतिष्ठापिता जनकल्याणकारिणी संयुक्तपरिवारव्यवस्थाऽस्तव्यस्ता जाता। उपभोक्तृसंस्कृतिसमुपासकेभ्य एकलपरिवारे वासो रोचते। परिणामतः गृहस्वामिनो, गृहस्य गौरवभूता च वृद्धा उपेक्षिता अशरणाश्च जाताः। वृद्धजना-नामभावे समुचितनिर्देशनमलध्वा बालकाः संस्कारं शून्या जाताः। धनार्जनाय आदिवसं पित्रोः गृहाद्बहिर्गतयोः शून्ये गृहे अनाथा इवात्मनो मन्यन्ते। बालका निरंकुशा इतस्तो भ्रमन्तो दुर्व्यसनेषु धनस्यापव्ययं कुर्वन्ति। सम्प्रति निखिलं विश्वमनेन व्याधिना ग्रस्तं दृश्यते। जनमङ्गलाय संयुक्तपरिवारव्यवस्थां पुनः द्रढीकर्त्तुं संयुक्तराष्ट्र-महासभा कृतसंकल्पा जाता। एतदर्थं 1993 तमे वर्षे 'संयुक्तराष्ट्रमहासषभया' प्रस्तावमेकं स्वीकृत्य प्रतिवर्षं 15 मई दिवस 'अन्ताराष्ट्रिय-परिवारदिवस' रूपेण मान्यः कृतः। संस्थापनादिवसादियं संस्था परिवार-कल्याण कृते सार्थक-कार्य-क्रमाणां आयोजनं करोति। वैदिकर्षिभिर्विहिता संयुक्तपरिवारव्यवस्था नूनं विश्व-कल्याणकरी दिव्यव्यवस्था वर्तते।

## हिन्दी अनुवाद

क्रान्तदर्शी वैदिक ऋषियों द्वारा मानव कल्याण के लिए विहित 'संयुक्त परिवार प्रथा' कालक्रम में आज समस्त विश्व में प्रशंसनीय अन्तर्राष्ट्रीय स्तर पर वाञ्छनीय वरणीय एवं अनुकरणीय प्रतीत हो रही है। वैदिक काल से ही भारत भूमि पर पल्लवित पुष्पित एवं सुप्रतिष्ठित संयुक्त परिवार व्यवस्था परिवारों से स्वर्ग के समान सुख का सञ्चार कर रही है। परम्परागत भारतीय परिवारों में पुत्र, पिता-दादा-पड़दादा का परिवार एक साथ रहा है। प्रपौत्र के जन्म होने पर परिवार में विशाल महोत्सव का आयोजन किया जाताहै। भारत में प्रपौत्र का जन्म स्वर्ग की सीढ़ियों को प्राप्त करने के समान मङ्गलमय माना जाता है। सुख हो अथवा दुःख परिवार के समस्त सदस्य समान भाव से सुख का उपभोग एवं दुःख  के समाधान के लिए तत्पर रहते है। उत्सवों एवं आपत्काल में परिवार में सब सदस्यों की अहम् भूमिका रहती है। भवन निर्माण में ईंटों के समुचित संयोजन की भाँति परिवार के समस्त सदस्यों के बीच अन्योन्याश्रय सम्बन्ध होता है। बड़ों छोटों के बीच समुचित आचार-विचार-व्यवहार परिवार में सामञ्जस्य बनाए रखता है। परिवार में पिता-पुत्र-पति-पत्नी भाई बहिनों के मध्य कैसा व्यवहार कैसी मार्यादा होनी चाहिए वेदों में यह सम्यक् रूप से प्रतिपादित किया गया है-

पुत्र पिता का आज्ञाकारी हो माता के प्रति सौमनस्य से परिपूर्ण व्यवहार करे। पत्नी पति से मधुर वाणी बोले भाई भाई से द्वेष न करें अथा बहिन बहिन से कभी द्वेष न करे सभी लोग समान आचरण एवं शुभ कर्म से युक्त हो -

अथर्ववेद 3/30/2-3

ऋग्वेद के दशम मण्डल में विवाह के पश्चात् नवदम्पती को आशीर्वचन से अभिषिक्त करते हुए वैदिक ऋषि नवयुगल को सुखी दाम्पत्य जीवन दीर्घायु पुत्र पौत्र एवं नातियों के साथ संयुक्त परिवार में चिरकाल तक रहने के लिए मङ्गल कामना करते हुए कहते है-

हे नवयुगल तुम यहीं रहो कभी वियुक्त मत होना अपनी पूर्ण आयु अपने पुत्र दौहित्रों के साथ आनन्दपूर्वक अपने घर में रहो। - ऋग्वेद 10/

पारिवारिक सम्बन्धों के मर्म को जानने के लिए वाल्मीकि रामायण आदर्श ग्रन्थ रत्न है। वेदों में वर्णित पारिवारिक सम्बन्धों की आचार-संहिता वाल्मीकि रामायण में आदर्श पात्रों के माध्यम से प्रस्तुत की गई है।

पुत्र राम के वियोग में पिता दशरथ द्वारा प्राणों की आहुति पुत्र प्रेम ही पराकाष्ठा प्रस्तुत कर रही है। इसी प्रकार पिता के वचनों की रक्षा के लिए चौदह वर्ष पर्यन्त घोर वन में निवास पितृभक्ति का अनुपम उदाहरण है। अपने पति रामके साथ भयानक वन में जाने के लिए दृढ़ संकल्पवती सीता अपने महान्-त्याग एवं अपूर्व पति प्रेम के कारण आज नारी जाति का आदर्श है। राम के अत्यन्त उदार भाई प्रेम से रहते हुए एक दूसरे के लिए प्राणों का त्याग करने के लिए तत्पर रहते है।

किन्तु स्वार्थ परायण युग में वैश्वीकरण की प्रबल आंधी से संस्कृतिवृक्ष की शाखाएँ प्रकम्पित हो रही हैं। और इस आँधी से संयुक्त परिवार की अवधारणा शिथिल होती प्रतीत हो रही है। सांस्कृतिक मूल्यों के ह्रास होने से परिवारों में प्रसाद के स्थान पर अवसाद प्रविष्ट हो रहा है वैदिक ऋषियों द्वारा प्रतिष्ठापित जनकल्याणकारी संयुक्त परिवार व्यवस्था अस्तव्यस्त होती दिखाई दे रही है। उपभोक्ता संस्कृति के उपासकों को एकल परिवार व्यवस्था आकृष्ट कर रही है। फलस्वरूप घर के मालिक परिवार के गौरव, वृद्ध अपेक्षित एवं अशरण हो रहे हैं। वृद्धों के अभाव में समुचित निर्देशन न पाकर बालक संस्कार विहीन हो रहे हैं। धनार्जन के लिए दिन भर घर से बाहर चले जाने पर सूने घर में अपने को अनाथ समझने वाले बालक निरंकुश होकर इधर-उधर भटकते रहते हैं तथा दुर्व्यसनों में धन का अपव्यय करते हैं। आज समस्त विश्व इस रोग से ग्रस्त हो रहा है। मानव कल्याण के लिए संयुक्त परिवार, व्यवस्था को सुदृढ़ करने के लिए 'संयुक्तराष्ट्र महासभा' प्रयत्नशील है। इस प्रसंग में 1993  ई में संयुक्त राष्ट्र महासभा ने एक प्रस्ताव स्वीकृत किया जिसके अनुसार प्रतिवर्ष 15 मई को  'अन्तर्राष्ट्रीय परिवार दिवस' के रूप में मनाया जाता है। अपने संस्थापना काल से ही यह संस्था परिवार कल्याण के लिए सार्थक कार्यक्रमों का आयोजन कर रही है। वैदिक ऋषियों द्वारा विहित संयुक्त परिवार व्यवस्था निश्चय ही दिव्य एवं विश्वकल्याण कारी व्यवस्था है।

**-सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# वसन्ते श्लेष्मा प्रकुरुते गदान्

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**आयुर्वेदे तु संवत्सरं षडङ्गं प्रोक्तम्। तत्र शिशिरोऽथ वसन्तश्च ग्रीष्मवर्षाशरद्धिमाः इत्येते षड्ऋतवः प्रसिद्धाः। एतेषां ऋतूनां स्पष्टः संविभागस्तु केवलमुत्तरभारते एव व्यक्तो भवति। यदा यदा हि ऋतुपरिवर्तनं भवति तदा तदा ऋतुपरिवर्तनेन समुत्पन्नैः रोगैः जनास्त्रस्ताः भवन्ति। विशेषेण तु यदाहि निदाघानन्तरं वर्षर्तोरागमनं भवति तदा वातप्रधानानां रोगाणां समुत्पत्तिर्जायते। यदा च वर्षानन्तरं शरदर्तोरागमनं भवति तदा पित्तप्रधानानां रोगाणां समुत्पत्तिर्भवति। एवमेव हि यदा वसन्तर्तोरागमनं भवति तदापि विभिन्नानां रोगाणामुत्पत्तिः सभवति। विशेषेण तु हेमन्त-शिशिरयोः निचितः श्लेष्मा वसन्ते दिनकृद्भाभिरीरितः स्रोतसु परिव्याप्तः सन् प्रथमं कायाग्निं बाधते। ततः बहून् रोगान् प्रकुरुते।**

आयुर्वेद में तो वर्ष छः अङ्गों (छः ऋतुओं) वाला कहा गया है। शिशिर, वसन्त, ग्रीष्म, वर्षा, शरद् और हेमन्त ये छः ऋतुयें प्रसिद्ध हैं। इन ऋतुओं का स्पष्ट विभाजन केवल उत्तरभारत में ही व्यक्त होता है। जब जब ऋतुपरिवर्तन होता है तब तब ऋतु परिवर्तन से उत्पन्न रोगों से लोग त्रस्त होते हैं। विशेषरूप से तो जब ग्रीष्म ऋतु के बाद वर्षा ऋतु का आगमन होता है तब वातप्रधान रोगों की उत्पत्ति होती है और जब वर्षा के बाद शरद् ऋतु का आगमन होता है तब पित्तप्रधान रोगों को उत्पत्ति होती है। इसी प्रकार जब वसन्त ऋतु का आगमन होता है तब भी विभिन्न रोगों की उत्पत्ति होती है। विशेष रूप से तो हेमन्त और शिशिर ऋतुओं में संचित श्लेष्मा वसन्त में सूर्य की किरणों से प्रेरित होकर स्रोतस में परिव्याप्त होता हुआ प्रथम कायाग्नि को बाधित करता है। इसके बाद बहुत रोगों को उत्पन्न करता है।

**वसन्ते प्रविलायितेन श्लेष्मणा विशेषरूपेण ज्वरस्य प्रतिश्यायस्य कासश्वासयोश्च समुत्पत्तिर्भवति। कालेऽस्मिन् समुत्पन्नेषु रोगेषु ज्वरः बहुसंख्यकान् नरान् पीडयति। ज्वरेऽस्मिन् शिरोग्रहः प्रतिश्यायः कासः गौरवं तन्द्रा स्तैमित्यं पर्वणां च रुक् भवति। सन्तापेन त्रस्तं जनं ज्वरः शीघ्रं न मुञ्चति। अतएव कालेऽस्मिन् विशेषेणावधानता वर्तनीया। प्रातःकाले सायंकाले च संवृतमेव परिभ्रमणं अन्यद्वा कर्म करणीयं वर्तते। मध्याह्नेऽप्यातपसेवनं न करणीयम्।**

वसन्त में पिघलाये हुए श्लेष्मा के द्वारा विशेषरूप से ज्वर की, प्रतिश्याय की और कास-श्वास की उत्पत्ति होती है। इस काल में उत्पन्न रोगों में ज्वर बहुत से लोगों को पीडित करता है। इस ज्वर में शिरोग्रह प्रतिश्याय, कास, गौरव, तन्द्रा, स्तैमित्य और अङ्गुलि-पर्वो में वेदना होती है। सन्ताप से त्रस्त व्यक्ति को ज्वर शीघ्र नहीं छोड़ता है। अतः इस काल में विशेष रूप से सावधानी रखनी चाहिये। प्रातःकाल में और सायंकाल में गर्म कपड़े पहनकर ही परिभ्रमण या अन्य कर्म करना चाहिये। मध्याह्न में भी आतपसेवन नहीं करना चाहिए।

**कालेऽस्मिन् श्लेष्मजन्यस्य अथवा वातश्लेष्म-जन्यस्य ज्वरस्य समुत्पत्तिर्विशेषेण भवति। अतः**

**कफापहारिणामौषधद्रव्याणामाहारद्रव्याणां च सेवनं सुखावहं भवति। वर्तमानकाले स्वायन-फ्लूनाम्ना यः प्रतिश्यायकासप्रधानः ज्वरः भवति, तत्र तु एच-वन-एन-वननामधारी श्वसनस्थो वायरस इति नामधारी जीवाणुः भवति सोऽतीव दुःसाध्यो वर्तते। ज्वरेऽस्मिन् श्वास-कास-पीनस-सन्तापैः पीडितः जनः श्रमं भ्रमं क्लमञ्चानुभवति। कदाचिच्च शूलोदरपीडितः सः कण्ठक्षतमप्यनुभवति। तस्य चिकित्सा शीघ्रतया करणीया।**

इस काल में श्लेष्मजन्य या वातश्लेष्मजन्य ज्वर की उत्पत्ति विशेष रूप से होती है। स्वायनफ्लूनामकजो प्रतिश्याय कास प्रधान ज्वर होता है, वहाँ तो एच-वन-एन-वननामक श्वसनस्थ वायरस नामक जीवाणु होता है। यह अतीव दुःसाध्य होता है। इस ज्वर में श्वास-कास-पीनस-सन्ताप से पीडित व्यक्ति श्रम, भ्रम और क्लम का अनुभव करता है। कदाचित् उदरशूल से पीडित होकर वह कण्ठक्षत (गले में छाले) का भी अनुभव करता है। उसकी चिकित्सा शीघ्रतया करनी चाहिए।

**वसन्ते स्वस्थेनापि जनेन षडङ्गपानीयस्य प्रयोगः करणीयः। आचार्यः चरकः कथयति-**

**मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैः।**
**शृतशीतं जलं दद्यात् पिपासाज्वरशान्तये।।**

**(च.चि. 3/145)**

**अस्य पानीयस्य निर्माणं तु जलसंस्कार-परिभाषया करणीयम्। सा परिभाषा त्वत्रोल्लि-ख्यते-**

**यदप्सु शृतशीतासु षडङ्गादि प्रयुज्यते।**
**कर्षमात्रं ततो द्रव्यं साधयेत् प्रास्थिकेऽम्भसि।।**
**अर्धशृतं प्रयोक्तव्यं पाने पेयादिसंविधौ।**

वसन्त में स्वस्थ व्यक्ति द्वारा भी षडङ्गपानीय का प्रयोग करना चाहिए। आचार्य चरक कहते हैं-

मुस्तक, पर्पटक, उशीर, चन्दन, सुगन्धवाला और सोंठ को उबालकर ठण्डा किये हुए (शृतशीत) जल को पिपासा और ज्वर की शान्ति के लिए देना चाहिए।

इस पानी का निर्माण जल संस्कार परिभाषा द्वारा करना चाहिए। वह परिभाषा यहाँ उल्लिखित की जा रही है-

जो शृतशीत (उबालकर ठण्डा किया हुआ) षडङ्गपानीय प्रयुक्त किया जाता है। इसके लिए एक कर्ष की मात्रा में औषधद्रव्य को एक प्रस्थ जल में उबाला जाता है। आधी मात्रा में जल शेष रहने पर उस जल को पीने और पेया आदि भोजन की कल्पनाओं के निर्माण में प्रयुक्त किया जाता है।

**अस्य सिद्धजलस्य प्रयोगः ज्वरमपवारयति। ज्वरग्रस्तस्य ज्वरं निवारयति च। अत्र केषाञ्चित् क्वाथयोगानामुल्लेखोऽपि क्रियते। एतेषु कस्य-चिदेकस्य क्वाथस्य प्रयोगः स्वस्थेन जनेनापि करणीय एव। तेन हि श्वासकासप्रतिश्यायज्वरा-दीनामाक्रमणं न भवति। यदि चेत् दौर्भाग्येन ज्वरग्रस्तो भवति तदापि अन्याभिरोषधीभिः सह कस्यचिदप्येकस्य क्वाथस्य प्रयोगः लाभकारी भवति। तेन हि कफस्य क्षपणं भवति, कासश्वास-योरपवारणं जाठराग्रेरभिवर्धनं च भवति।**

इस सिद्धजल का प्रयोग ज्वर को दूर करता है। ज्वरग्रस्त व्यक्ति के ज्वर का निवारण करता है। यहाँ कुछ क्वाथयोगों का उल्लेख भी किया जा रहा है। इसमें से किसी एक क्वाथ का प्रयोग स्वस्थ व्यक्ति के द्वारा भी किया जाना चाहिए। इससे श्वास-कास-प्रतिश्याय-ज्वर

आदि का आक्रमण नहीं होता है। यदि दुर्भाग्य से व्यक्ति ज्वरग्रस्त होता है तब भी अन्य औषधियों के साथ किसी एक क्वाथ का प्रयोग लाभकारी होता है। इससे कफ का क्षपण होता है, कास-श्वास का अपवारण और जाठराग्नि का अभिवर्धन होता है।

**विश्वादिक्वाथः- शुण्ठीनिम्बगुडूचीपिप्पली-मूलैः सुनिर्मितः क्वाथः प्रयोज्यः।** सोंठ, नीम, गिलोय और पिप्पलीमूल का क्वाथ से निर्मित क्वाथ प्रयोज्य है।

- **यवासकादिक्वाथः-**

**यवासकशुण्ठीकुटकीकर्चूरैरण्डमूलपुष्कर-मूलकर्कटशृङ्गीभिर्निर्मितेन कषायेण तीव्रस्य सन्तापस्य निवारणं भवति, स्वस्थेनापि सेवनीयोऽयं कषायो निरापदो वर्तते।**

जवासा, सोंठ, कुटकी, कचूर, एरण्डमूल, पोखरमूल एवं काकड़ासिंगी से निर्मित क्वाथ से तीव्र सन्ताप का निवारण होता है, स्वस्थ व्यक्ति द्वारा भी यह कषाय सेवनीय और निरापद है।

- **द्राक्षादिक्वाथः -**

**द्राक्षाहरीतकीमुस्तककुटक्यारग्वधैः सुनिर्मितः कषायः विबन्धं हरति, ज्वरस्यापवारणं च करोति।**

मुनक्का, हरीतकी, नागरमोथा, कुटकी, अमलतास के फल का गूदा और पित्तपापड़ा से निर्मित कषाय विबन्ध को दूर करता है और ज्वर को दूर करता है।

- **वनप्सादिक्वाथः -**

**वनफसायाः पुष्पाणि द्राक्षाफलानि गावजवां-खतमी-उन्नाब-श्लेष्मातकेत्यादिभिर्ख्यातैः द्रव्यैर्वि-निर्मितः कषायः कासश्वासप्रतिश्यायज्वरादीनाम-पवारणं निवारणं च करोति।**

गुलबनफ्सा, मुलहठी, मुनक्का, गावजवाँ, खतमी, उन्नाब, लिसोड़ा इन द्रव्यों से निर्मित कषाय कास-श्वास-प्रतिश्याय-ज्वर आदि का अपवारण और निवारण करता है।

- **कासह्रासकरः क्वाथः -**

**वासामधुयष्टीकण्टकारीकुलञ्जनजूफानामभिः प्रसिद्धैः पञ्चभिर्द्रव्यैर्निर्मितः कषायः कासस्य निवारणं करोति, कफस्य च निर्हरणं शीघ्रतया सरलरूपेण करोति। अत्र यदि चेत् त्वक्चूर्णस्य सम्मिश्रणमपि कषायनिर्माणकाले एव भवेत् तदा त्वधिकः प्रभावी भवत्येषः कषायः।**

अडूसा, मुलेठी, कटेरी, कुलञ्जन एवं जूफा का क्वाथ कास का निवारण करता है और कफ का निर्हरण शीघ्रतया सरल स्वरूप में करता है। इसमें यदि दालचीनी के चूर्ण का सम्मिश्रण भी कषाय का निर्माण करते समय किया जाये तब यह कषाय अधिक प्रभावी होता है।

**इत्येतेषां कषायाणां मात्रा विंशतिग्रामपरिमितैव पर्याप्ता भवति। कस्यचिदप्येकस्य कषायस्य ग्रहणं विंशतिग्राममात्रायां कृत्वा 400 मि.ली. परिमिते जले प्रक्षिप्य चतुर्थांशावशिष्टं कृत्वा वस्त्रेण परिक्षाल्य पातव्यम्। यदि चेत् कषायस्य प्रयोगक्रमे श्रेष्ठस्य कस्यचिद्भिषजः परामर्शः सुलभो वर्तते, तदा तु श्रेष्ठं भवति। अन्यथा तु निरापदाः ह्येते कषायाः वसन्ते सेवनीयाः फलप्रदाश्च भवन्ति।**

इन कषायों की मात्रा बीस ग्राम पर्याप्त होती है। किसी एक कषाय का ग्रहण बीस ग्राम मात्रा में करके 400 मिली जल में डालकर चौथाई शेष रखकर वस्त्र से छानकर पिलाना चाहिए। यदि कषाय के प्रयोगक्रम में किसी श्रेष्ठ चिकित्सक का परामर्श सुलभ हो, तो श्रेष्ठ होता है। अन्यथा तो निरापद ये कषाय वसन्त में सेवनीय और फलप्रद होते हैं।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

हमारी विशेषताएं

(English) Weekly
ORGANISER



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our
Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/- पाञ्चजन्य ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,